M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 595

Title: Parikhaghodalaksana
Granth
Salhaunkhana Dipika

395

सर्वानुक्रम दीपिकायां परिभाषोदाहरण
ग्रंथः

Title	Paribhāshodāharana Grantha .X.
Author	Ganesh Krishna Dokhale
Editor	
Year, Vols.	
Publisher	
Remarks	395 .X. from Sarvānukrama Deepikā

तत्राम्नाये। अथशब्द आनंतर्यमंगलाधिकारेषुद्रष्टव्यो। र्थत्रयसंभववात्। कथमिदं संभवेदिति। तदुच्यते। अथ ऋग्वेदस्याधीतस्याहसामर्थ्यफलसंधित्सायेदमारभ्यत इत्यानंतर्यः
अपिचस्मणादेव ॐकारः। अधिकारः प्रस्तावः प्रकृतिर्नामसूक्तप्रतीकादीनां पंचानामपि प्रतिसूक्तमाशास्त्रपरिसमाप्तेर्द्रष्टव्या। ननु तथा कथमेकस्य शब्दस्य सकृत्प्रयुक्त

श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ॥ ॐ३म् ॥ वक्रतुंडंमहेशानं जगद्धांसरस्वतीं। वेदब्रह्मगुरूंश्चैवप्रणतोस्मियथाक्रमं १
वेदादिराजऋग्वेदोविख्यातःपुरुषोमहान्। सैवनारायणःप्रोक्तस्तस्मैवेदात्मनेनमः २। भट्टकृष्णःपितायस्यजननीरुक्मिणीसती। त
स्यात्मजोमहादेवोडोरवलेत्युपनामकः ३॥ परिभाषांविधायाथसर्वानुक्रममेवच। गणेशाख्यस्तनोतीमांसर्वानुक्रमदीपिकां ४
अथऋग्वेदाम्नायेशाकले॥ अथशब्दोमंगलेप्रस्तावेच। अस्यद्वितीयार्थः अथशब्दःपूर्वमेवमंगलार्थःसउच्यते। सब्रह्मपरमंत्रो
यस्मरणात्सर्वतःशुभः अपिच। ॐकारश्चाथशब्दश्चद्वावेतौब्रह्मणःपुरा। कंठंभित्वाविनिर्यातौतेनमांगलिकावुभाविति। सर्वे
दाऋग्वेदाच्छाकल्यादित्यर्थः। मंत्रब्राह्मणयोर्वेदइतिवचनात्। ऋचांदशसहस्राण्यृचांपंचशतानिच। ऋचामशीतिपादश्चैतत्पा
रायणमुच्यतइतिग्रंथांतरवचनात्। आम्नाये। सम्यगभ्याससुक्तेरविकराहितइति। तत्रवेदाभ्यासःपंचधाविहितः। अध्ययनविचारो
भ्यसनंजपोध्यापनमिति। स्मर्यते। वेदस्वीकरणंपूर्वंविचारोभ्यसनंजपः। तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंचधाइति। त
दपिवक्ष्यति। एकःश्रोतादक्षिणतोनिषीदेद्द्वौवाप्रश्नसंख्यायथावकाशमित्यध्यापनं। अस्यार्थः। एकःश्रोताशिष्यःसदक्षिण
उपविशेदित्यर्थः। अथवाद्वौशिष्यौ॥ अथवाप्रश्नसंख्यः बहवःशिष्याःयथावकाशमित्यनियमइत्यर्थः। तथा। अभ्यासार्थेद्रुतां

स्यापवेषु नैषदगोशब्दत्वात्। नादिम्नराशिमवजेषुपश्चादिस्वर्गवादपु दशास्वर्थेषुमेधावगोशब्दंमुपलक्षयेदादि

५ गोकलो वल्कः शैशिर आश्वलायन मुद्गलो इति वा पाठः।

६ ऋग्वेदादिर्महाशाखाकल्पाख्या चैव रास्मृता। गोभिलाः शौनकाः सर्वे कल्पशाखाप्रवक्तृकाः ६

म· दी·

१

द्रुतं प्रयोगार्थं तु मध्यमां। शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं विलंबितामिति। अस्यार्थः। द्रुतशब्दात्स्वमावर्तनेत्वरितवृत्तिः ततः प्रयोगा
र्थं जायते मध्यमवृत्तिः ततः शिष्योपदेशात् अध्यापकेन विलंबितवृत्तिरित्यस्या सलक्षणमिति प्रातिशाख्ये। स च विचारो द्विवि
धः। अर्थतो लक्षणतश्चेति। शाकलके। शाकलमहर्षिप्रवक्तृक इत्यर्थः। उक्तं च। ऋचां समूह ऋग्वेदस्तमभ्यस्य प्रयत्नतः। पठितः
शाकलेनादौ चतुर्भिस्तदनंतरं। उक्तं च। सांख्याश्वलायनौ चैव मांडूको बाष्कलस्तथा। बह्वृचा ऋषयः सर्वे पंचैते ह्येकवेदिनः। अपि
च। मुद्गलो गोखलो वात्स्यः शालीयः शैशिरस्तथा। पंचैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः। इति पुराणप्रातिशाख्यवचना
दिति। सूक्तप्रतीक ऋक्संख्या ऋषिदैवतछंदांस्यनुक्रमिष्यामः। तत्र सूक्तप्रतीकमग्निमीळ इत्यादिसूक्तं सहस्रं सप्तदशाकं सपादाधि
कं च। तस्य सूक्तप्रतीकावयवः संसमिदित्यंततः। तत्र सूक्तं निराकांक्षमृषेर्वचः। तदुक्तं बृहद्देवतायां। संपूर्णमृषिवाक्यं तु सूक्तमि
त्यभिधीयते। चित्रं तद्दृश्यते चास्मिन्नेकस्यां बहुषु द्वयोरिति। यथा ऋषिसूक्तं देवतासूक्तं छंदःसूक्तमर्थसूक्तं चेति। तत्रोच्यते। ऋषि १
सूक्तानि यावंति सूक्तान्येकस्य वैहालारित्यृषिसूक्तं। यथा मधुच्छंदाः ऋषिसूक्तं निदर्शनमिति। ततः स्वयंते। कं तु यावत्कदेवताया खलु
च्यते। यावत्सूक्तं विं देवता च तत्सूक्तं दैवतं स्यादिति। देवतासूक्तं। यथा मंडलादि आग्नेयमिति। तथा नवमं मंडलं पावमानं सौम्यमित्या
दिदेवतासूक्तं निदर्शनं। ततः समानछंदसो यास्कतछंदः सूक्तसूक्तमुच्यत इति छंदःसूक्तं। यथा अग्निमीळ इत्यादि गायत्रं छंदो

४ चातुर्वैध्यमपाकुः स्त्वमीषां

२ समानछंदसो यास्कतछंदः सूक्तमुच्यते

७ ऋक्संख्यैवात्योभिन्नस्वरति ७

गत्यं तित्वेत्यतः शाकृतछंदःसूक्तं निदर्शनमिति। ततः यावत्तदर्थं समाप्यते तदर्थसूक्तं वदंतीति तदित्यर्थसूक्तं। तत्र सत्त्वार्थमंत्र व्याख्याप्येति। त
दर्थसूक्तं बोद्धव्यं। इति वृद्धाचार्याः। तत्रर्षिसूक्तं देवतासूक्तं छंदःसूक्तमर्थसूक्तं केचिन्मतं। प्रशंसामात्रमेव। एतान्यृष्यादीनि चत्वारि स्व
कानि जोयाजनाध्यापने अनुष्ठानं नास्ति। अर्थवाद इति विज्ञेयं। यथा। आग्नेया वै प्रयाजाः। अथ च। छंदांसि वै प्रयाजा इत्यादिने रुक्के व्याख्या
तं। तत्राग्नेया इति तु स्तुतिर्विधिकिमात्रमितरमिति निदर्शनं। यथा गायत्रं प्रउगं कुर्यात् इत्यादि जागतं प्रउगमित्यंतमारण्यके मुक्तं। प
तत्र तु गायत्रमेव कुर्यादिति द्वितीयनिदर्शनं। तत्राग्निमीळ इत्यादिसूक्तानि सहस्रसप्तदशकानि याजनाध्यापने अनुष्ठानसिद्धिरि
त्यर्थः सर्वत्र। ऋक्संख्या। ऋचामेकत्वात्। तत्र जातवेदस इत्येकर्चं सूक्तमित्यादि द्वाविंशतं चतुष्कं पंचकं षट्कमित्युत्तरोत्त
रध्यानुपरिगण्यत इत्यृक्संख्या सहस्रसप्तदशाधिकं सूक्तं वेदितव्यं। पादाधिकमित्यपवादः। ऋषयस्तु तैर्मंत्रदृशः ते चतुर्वि
धाः। ऋषयः ऋषिपुत्राः ऋषिकाः स्वयंभुवमिति। तदुक्तं। ऋषीणामृषिपुत्राणामृषिकाणां स्वयंभुवां। तथैवानाभिजानीयाद्य
येषां मंत्रद्रष्टयः प्रवरे ये समाम्नाता ऋषयस्त इति श्रुतिः। तत्र प्रत्यंगिरसो रहूगणः। तत्पुत्रो गौतमः। तत्पौत्रो वामदेवः। तत्र

१ तत्पुत्रपौत्रनप्तार ऋषिपुत्रा इति स्मृताः। राजन्यवैश्ययत्नर्षिका स्त्रियस्ता स्तिर्यग्योनयः। देवादेवशरीनयोगंधर्वास्ते स्वयंभुव इति। देवताया अपि द्वैविध्यमेव· तत्र शौनकमते· ताश्च
यस्त्रिंशत्पृथ्व्यायोध्यर्ध एकत इति। वस्थातित्वात्तिकल्पस्तोतत्र वा न दर्शयामीति = ०

स·टी· बन्नहहुक्वदूत्यदाहरणं।अन्यच्च।प्रकृतगाथीऋषिः।तत्पुत्रोविश्वामित्रः।तृत्योरोमधुच्छंदाः।तन्नप्राजेनाइतिद्वितीयोदाहरणं॥
२ तथान्निष्ठुत्रीविश्ववारानाम्नीऋषिका॥अपिच।प्रजापतिपुत्रीदक्षिणाऋषिका।तथागोधाघोषाइत्यादि।एताब्रह्मवादिन्यइति
स्त्युदाहरणानि।अपिच।सहस्रशीर्षासूक्तद्रष्टानारायणऋषिरितिस्वयंभुवइति।तथाआयंगोःसूक्तद्रष्टीसार्पराज्ञीतिस्व
यंभुवाइतितस्यागोत्रोत्पत्तिर्नास्ति।दैवतं।अग्न्यादीन्द्रोविष्णुरित्यादिदेवता।यल्लिंगंसादेवता।मंत्रदेवताइत्यर्थः।अग्निःसर्वा
देवता।विष्णुःसर्वादेवता।इतिश्रुतिः।यन्नामादेवत्यास्तेनाम्यादेवताः।इतिश्रुत्युदाहरणानि।छंदांसि।१ छंदःपापेभ्यः
छादनानीत्यर्थः।छादयंतिहवाएनंछंदांसिपापात्कर्मणइतिश्रुतिः।छंदांस्यल्पिनानाविधान्येवगायत्र्यादीन्यतिधृत्यवसानानि।च
तुर्दशछंदांसिशाकलसंहितायांपठ्यंते।अष्ट्यादीनिवैखिलत्वात्।अपिच।यथांतरेपठ्यतइति।एतासूक्तप्रतीकादीनपंचानुक्र
मिष्यामीत्याख्यास्यामइत्यर्थः।सूक्तप्रतीकादेश्चपंचकस्यप्रतस्यसूक्तमुपस्थापनंवेदितव्यं।आसास्वपादसमाप्तेस्तत्रोदाहरणावा
दृष्टं।यथासहस्रशीर्षाषोळशर्चंसूक्तं।नारायणऋषिःपुरुषोदेवता।अनुष्टुप्छंदःअत्यर्चस्त्रिष्टुप्।इतिसर्वत्रनिदर्शनं।एवंसर्वे २

३अनादेशोस्मिन्ग्रंथइति २

इतिआह।कुतःपुनरेतल्लभ्यते।किंधार्मिकंप्रतिपत्त्संआहोस्वित्आगामधुरेभिति·उच्यते।~॥~तद्यथा·इंद्रस्यनुवीर्याणि१५इत्यृक्संख्याहैरण्यस्तूपीयमित्यार्षं·प्रदेशांतरेचसैवार्थेवादिंद्रस्यनिकेवल्यमितिदैवतं·आनिष्ठाउवर्तगे।
रिवीतिमित्यार्षं।अननवन्मठत्वतीयामांदैवएतच्चदृष्टोनविदंदधातीतिछंदस्त्वंचमाद।तत्रतत्रान्वेष्टव्यंस्यादेतत्·ऋतिशातपादितेस्मिन्नर्थेऽस्यारंभानुपपत्तिः।नहिऋतिप्रकाशितेस्वर्थेपुरुत्कर्षःकश्चिदस्तीतिनखल्वन्यपरेणतावत्कार्तोपदेशा
तस्मात्तेनचोपनयनादिनारतलमानं·यद्वा·यथोपदेशमिति·यथेवभगवताशौनकेनोपदिष्टानाक्रमानुक्रमेणोपदिष्टमितिततस्तदोषप्रसक्तिरित्यत्रच्यते·ननुखल्वपिअस्तिहिविशेषोलाघवंनाम·तत्रघेवाद्वप्रकीर्णं।तदिहसंक्षेपेणोपसंहृतकं।

वक्तृवचनानिर्देशःप्रतिपादिताइति॥यथोपदेशं।यथाविधिरुपदेशःउपदेशशब्देनचाश्रुतदर्शनान्येवविवक्षितानि।तथाशौनकाचार्या
श्वलायनाचार्यानुक्रमणित्रुपदेशानतिक्रमेणसर्वानुक्रमिण्यनारंभसंबंधज्ञानकारणसंकीर्तनतदासरंभसमर्थयइतिवेदितव्यं।।नहेतत्
ज्ञानमंतरेणश्रौतस्मार्त्तकर्मप्रसिद्धिः।ज्ञानंविनाश्रौतकर्माण्यग्निहोत्राण्यग्निष्टोमादीनिविश्वसृजामयनांतंश्रुतिविहितंकल्पसूत्रकैर्व्याख्या
तं।यथाहोतामैत्रावरुणःपुरोनुवाक्यायाज्याशस्त्राणि।यज्ञानषाउग्रसहसेतुरायेत्येकादशर्चंसूक्तंगोरिवीत्यार्षमिंद्रदैवत्यंत्रैष्टुभं
मरुत्वतीयंशस्त्रं।अपिच।इंद्रस्यनुवीर्याणिप्रवोचंपंचदशर्चंसूक्तंहैरण्यस्तूपमार्षमिंद्रदैवत्यंत्रैष्टुभंनिष्केवल्यंशस्त्रं॥इतिश्रौतोपदेशं।तथास्मा
र्त्तकर्माणिगृह्यसूत्रेतथाचस्मार्त्तविहितंगर्भाधानादिसंस्कारोपनयनोपाकर्मवेदारंभोर्ध्वदैहिकांतंपंचमहायज्ञादि।कर्मशब्दःआदिकर्म
णिप्रसिद्धिः।फलप्रदानमेतज्ज्ञानमंतरेणऋषिदैवतछंदइत्येतत्।ज्ञानव्यतिरिक्ते।एतदज्ञानात्कृतश्रौतकर्मणांफलासंभवति।अयाता
कंधाषे।यज्ञानाध्यापनंनैवमावर्तयंपठेद्द्विजः।ऋषिच्छंदस्यविज्ञातमवीर्यंकर्मनिःफलं।इत्यध्यायाद्यज्ञानेनमंत्रकंटकत्वादनधिकृत्वा
च्चसर्वत्र।तदज्ञानमनर्थकत्वमित्यर्थः।तथाहस्मर्यते।अविदित्वाऋषिच्छंदोदैवतंयोगमेवच।योध्यापयेज्जपेद्वापिपापीयाञ्जायते
तुसः।ऋषिच्छंदोदैवतानिब्राह्मणार्थंस्वराद्यपि।अविदित्वाप्रयुंजानोमंत्रकंटकउच्यते।स्वरोवर्णोक्षरंमात्राविनियोगोर्थएवच।मंत्रं

गनुसमयेनचकरवाविबोधनार्थंकल्पनइतिविशेषःआह।प्रयोजनाभावादस्यारंभानुपपत्तिःनचस्वारथमास्तिप्रयोजनं।१॥ नहिराद्धोयस्मादृर्धेयमाद्देदमंतरेणाशेषपुरुषसाधनानांकर्मणामप्रसिद्धिःतस्मादिदंप्रारब्धमं·
प्रसिद्ध्यात्रफलसिद्धिविवक्षितादेवमेतत्·प्रशब्दप्रयोगात्·तथ्याह·धात्वर्थमात्रसिद्धिःकेनबाध्यते·श्रौतस्मार्त्तानिचप्रसिद्धान्येव·कुतएवततावभिनिवेत्·उच्यते ८

स॰ दी॰ जिज्ञासमानेनवेदितव्यंपदेपदइति। अस्यार्थःस्वरादियुक्तमंत्राणांदैवतंछंदोनिरुक्तब्राह्मणमृषीणामज्ञानेसर्वकर्मणांफल्गुत्वंदोषउक्तः
२ अथविदुषःफलमाह॥ मंत्राणांब्राह्मणार्षेयछंदोदैवतविद्याजनाध्यापनाभ्यांश्रेयोधिगच्छति। ।मंत्राणामग्निमीळइत्यादीनांविहि
तानांपदार्थानामनुष्ठानकालेस्मारकत्वयानुक्रमणावियोज्यवेदभागानांसंबंधीनां· ब्राह्मणंविधायकमग्निर्वैदेवानामित्यादिदीक्ष
णीयेष्ट्यादिपरिज्ञानाच्छ्रेयोदृश्यतइति। आर्षेयमृषिदर्शनमित्येवमधुच्छंदसप्रभृतयइत्यादि॥ छंदोगायत्र्यादीनिछंदांसीवरा
षि। दैवतमग्न्यादीन्द्रादिमंत्रलिंगंच। यथार्थज्ञानंयाजनाध्यापनाभ्यामितिप्रदर्शनार्थं। तत्रयाजंवैतानकान्यग्निहोत्राणिगृह्यप
रिचर्याणि। ततःअध्यापनं। शिष्योपदेशःस्वाध्यायब्रह्मयज्ञःसम्यक्ज्ञानमधीतंपुण्यंश्रेयःप्रशस्यस्वर्गमोक्षपुत्रादिमोक्षांतंफलमधिगच्छ
तिविशिष्टंप्राप्नोति। केवलपाठादृषिदेवतंछंदोज्ञानंविनाफलंनभवति। तथाज्ञानंप्रदर्शयत्फच्चराद्दृमंत्रेनैरुक्ते। योर्थज्ञइत्सक
लंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मेतिज्ञानप्रशंसेति॥ श्लोकः॥ मंत्राणांदेवताविद्यःप्रयुंक्तेकर्मसुकर्हिचित्। जुषंतेतस्यदेवाःसाहवि
र्नादेवताविदः। स्वाध्यायमेवयोधीतेमंत्रदैवतविच्छुचिः। असत्रसदपिस्वर्गंसात्रसाद्दूरपीज्यते। परिज्ञानेश्रेयोधिगमः। अपरिज्ञा
नेदोषाभावइति। वा। एवाभ्यामेवानेवंविदोयातयामानिछंदांसिभवंतिस्थाणुंवर्छति॥ एताभ्यांयाजनाध्यापनाभ्यां। अनेवंविद २
स्थावरत्वंप्राप्नोतिगर्तेपतितेपात्यतेधर्माध्यक्षण

इत्यस्य अज्ञानिइत्यर्थः। सर्वानुक्रमण्याज्ञानस्यैवंयथोक्तज्ञानस्यैवंयथोक्तज्ञानरहितस्ययातयामानिवीर्यहीनानिछंदांसिभवंति। अथवायातयामोजीर्ण
जीर्णभुक्तोच्छिष्टेपर्युषितादौवर्तते। तत्साहचर्याद्वानरसत्वात्छंदःस्वकर्मनइति। अनेवंवित्। अज्ञानेनकृतंकर्मतेनस्थाणुंवर्छति। स्थाणुंवृक्षजाति
वाऋच्छतिस्थावरत्वंप्राप्नोति। गर्तेवापात्यते। गर्तेनरकेकूपपंकमध्येमंडूककच्छपादिजातिषुपात्यते। असंत्याकैर्दोषैश्च। तत्रनैरुक्तेपूर्वार्धमंत्रेअज्ञा
नलक्षणनिंदाव्याख्याता। स्थाणुरयंभारहारःकिलाभूदधीत्यवेदंनाविजानातियोर्थमित्यज्ञानंनिंद्यते॥ श्लोकः॥ गर्तोयःपतितस्तमस्तत्तमःस
दृशोनरः। भारवाहीपशुरेवतस्यजन्मनिरर्थकं॥ ॥प्रमीयतेवापापीयान्भवति॥ ॥प्रमीयतेम्रियतेहिंस्यते। कुतएतत्सर्वत्रमितिचेत्। य
तःपापीयान्भवति। श्लोकः॥ अनभ्यासेनवेदानामाचारस्यचवर्जनात्। आलस्यादन्नदोषाच्चमृत्युर्विप्रान्जिघांसतीतिमनुवचनात्। अपिच॥
अतोमहर्षयःसर्वेवेदोवेदइतिस्थिताः। अधीयंतेकर्षयंतिदेहंमुंजाद्भिर्भुंजते। ततःअविचार्यपठेद्वेदःशिष्यैरध्यापनेत्ततः। म्रियतेतुसवेत्पा
पीयमलोकंसगच्छति॥ इतिविज्ञायते॥ सामवेदार्षेयब्राह्मणेविशेषेणज्ञायतइत्यर्थः॥ १॥ इतिप्रथमखंडः॥ ॥अथऋषयः॥ अथेत्यनंत
रंसामान्यविशेषनामानऋषयोभिधीयंते॥ शतर्चिनआद्येमंडले॥ आद्यमंडलस्थाऋषयःशतर्चिनसंज्ञिकाः। ऋचांशतंप्रायाधिकेद्रष्टारास्तदि
॥तद्योगेनसर्वेप्यशतर्चिनः। प्रायिकेपिशतेनिर्बाधत्वात्। शतर्चिसंज्ञाविज्ञेयाप्राद्यमंडलदर्शिनइति। मधुच्छंदःप्रभृतयोगस्त्यपर्यंताः
सर्वेएतेशतर्चिनइति। ददर्शसामधुच्छंदाद्यपिकंप्रायचांशतं। तत्साहचर्यादन्येपिविज्ञेयास्तशतर्चिनः। अत्रा छर्तिर्णैकेनयथानेकच्छत्रिणोभव

१ रुद्रमन्युरुच्यते यएतेरवत्वमीमंत्रद्रष्टारः सर्वेएतेपरस्येवविभूतिः कुलएवदिति वेत् । ऐतरेयकेप्यस्यार्थप्रसिद्धत्वात् = १०

अ० दी० का०
४

नीति ॥ अंत्येक्षुद्रसूक्तामहासूक्ताः ॥ अंत्येदशमेमंडले ॥ अग्नेबृहन्नितःप्रभृतयासंसमित्संवननपर्यंताःसर्वेक्षुद्रसूक्तमहासूक्तनामानः
तदिदासीयात्पूर्वंमहासूक्तं । परंक्षुद्रसूक्तंसूक्तदर्शित्वात् । तत्रक्षुद्रसूक्तंमहासूक्तंनिदर्शनं । यथाशतर्चिनआद्यमंडलेस्थिताःसंतोप्य
र्चद्रष्टारोयेऋषयःतेसर्वेचशतर्चिनसंज्ञिकाः । अपिच । बहृर्चद्रष्टारोयेऋषयःतेपिशतर्चिनसंज्ञिकाः । अपिच । बहृर्चद्रष्टारोयेऋषयःतेपि
शतर्चिनसंज्ञिकाः । तथामहासूक्तांतर्गताःक्षुद्रसूक्ताश्चतेसर्वेमहासूक्तसंज्ञकाभवंति । तत्रक्षुद्रसूक्तामहासूक्तावसानं । एकर्चारभ्य
र्चपर्यंतंक्षुद्रसूक्तं । ततोधिकंमहासूक्तं । ततःमहासूक्तलक्षणंपूर्वाचार्यैरुक्तं ॥ तशर्चतायाअधिकंमहासूक्तंविदुर्बुधाइति । श्रूयते । तन्म
हासूक्तंस्याद्भूयिष्ठेष्वेवतस्रुपुयजमानंप्रतिष्ठापयानबरोरोहेत्तन्महासूक्तंचेद्धिक्षितिः इतिब्राह्मणभाष्यव्याख्यातेति । ततःविधारण्यश्रीपा
दास्तूच्यतेसोब्रवीदहमिदंसर्वमसानियद्वक्षुद्रंयच्चमहदिति ॥ आरण्यकेश्रौतो ॥ जातवेदसेकर्चत्वात्क्षुद्रसूक्तं । अस्यवामस्येतिबहृर्चत्वा
त्महासूक्तं । तद्दर्शित्वात्तदृषयःक्षुद्रसूक्तामहासूक्ताश्चेत्याद्यः तद्योगाभिप्रायं ॥ तत्रक्षुद्रसूक्तमहासूक्तशब्दोयोगिकरूढोवायथाज्ञानेन
वेदितव्यौ । ।मध्यमेषुमाध्यमाः ॥ ॥मध्यमेषुद्वितीयमंडलादिषुनवममंडलावसानेषु । त्वमग्नेद्युभिर्गृत्समदप्रभृतयःयन्तेराजन्कश्यपइत्यं
ताःसर्वेमाध्यमसंज्ञकाऋषयइति ॥ तत्रारण्यकेश्रूयते । एषइमंलोकमभितिरचंडे । तस्माच्छतर्चिनस्तस्माच्छतर्चिनइत्याचक्षतएवमेवसंतं । त
स्मात्क्षुद्रसूक्तास्तस्मात्क्षुद्रसूक्ताइत्याचक्षतएतमेवसंतं । तस्मान्माध्यमास्तस्मान्माध्यमाइत्याचक्षतइतिनिरुक्तःसंज्ञावेदितव्याः ॥ अथमं

२ ततश्चाशेषमंत्रदृगधिकारस्थःपरमात्मैवादित्यमंडलेनीलपुंडरीकाक्षोनारायणइतिसिद्धं २

गिरसइतिप्रेक्षावरमित्यनेनाभिप्रायेणकाश्चिद्देशांतरेणकस्यचिद्इतादिनाविशेषितंब्रह्मऋषिस्त्रियादि अक्षियंस्त्रियावर्जेयेतातासांस्तवर्गाः त्रयःदेवतास्तावकः प्रथमोवर्गः द्वितीयसंवादस्तैरेवर्षिभिः
ण्यस्तूपइतिहिरण्यस्तूपस्याविशेषितत्वात् आंगिरसस्त्वं अविशेषितग्रहणात् विशेषितस्यप्रदेशांतरेपिनैवमंतव्यं यथासप्तमेमंडलेवसिष्ठोपरथादितिहान्यामिधानादपिप्रदेशांतरेविशेषितत्वात् मित्रावरु
देवत ऋषिदर्शनयोस्तत्वावकभावस्यनियतत्वात् स्तोतृदेवता ऋषिस्तावकः स्तुतिः तृतीयेतिवेति तथत्वाहः अर्थमिच्छन्नृषिर्देवतांयंयमाशामिहस्तिति ४

ब्रह्मण ऋषिदर्शनयोः ॥ गृत्समदः । तृतीयमंडलेविश्वामित्रः । चतुर्थमंडलेवामदेवः । पंचममंड
लेअत्रिः । षष्ठेमंडलेभरद्वाजः । सप्तमेमंडलेवसिष्ठः । अष्टमेमंडलेप्रगाथाः । नवमेमंडलेपावमान्यः । दशमेमंडलेक्षुद्रसूक्तामहासूक्ताइति । तथा
लेअत्रिः । षष्ठेमंडलेभरद्वाजः । सप्तमेमंडलेवसिष्ठः । अष्टमेमंडलेप्रगाथाः । नवमेमंडलेपावमान्यः । क्षुद्रसूक्तामहासूक्ताइतिद्वादशनामकाण्डेप्रसि
स्मर्यते । शतर्चिनोमाध्यमागृत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठःप्रगाथाःपावमान्यः क्षुद्रसूक्तामहासूक्ताइतिद्वादशनामकाण्डेप्रसि
स्मर्यते । शतर्चिनोमाध्यमागृत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठःप्रगाथाःपावमान्यः ॥ कश्चित्विशेषितं । अपिच । कश्चितअविशेषितं । उभौचेतदर्पत्रापरत्रवाविशिष्टे
ष्टेः कश्चित्प्रदेशविशेषितंब्रह्मर्षिमस्त्रियमनुक्तगोत्रमांगिरसंविद्यात् ॥ कश्चित्विशेषितं । अपिच । कश्चितअविशेषितं । उभौचेतदर्पत्रापरत्रवाविशिष्टे
ष्टेः कश्चित्प्रदेशविशेषितंब्रह्मर्षिमस्त्रियमनुक्तगोत्रमांगिरसंविद्यात् । त्रिरस्मैरेणुविश्वामित्रत्वंविशेषितमुदाहरणं । अन्यत्र । यथासप्तमंवसिष्ठोवसिष्ठोप
त् ॥ ॥ कश्चित्विशे॰ यथाऋषभस्तौवैरवामित्राविपरत्रदर्शनात् । त्रिरस्मैरेणुविश्वामित्रत्वंविशेषितमुदाहरणं । अन्यत्र । यथासप्तमंवसिष्ठोवसिष्ठोप
त् ॥ ॥ कश्चित्विशे॰ यथाऋषभस्तौवैरवामित्राविपरत्रदर्शनात् । ब्रह्मर्षिमस्त्रियमित्यर्थः । तेचहिरण्यस्तूपःकुत्सइत्यादिब्रह्मर्षिर्ज्ञेयं । कथंचित्राजर्षिपुरुमीढ
श्यत्विशेषितंतस्यनामदेगोत्रादेशेनाक्रियंतइति । ब्रह्मर्षिमस्त्रियमित्यर्थः । तेचहिरण्यस्तूपःकुत्सइत्यादिब्रह्मर्षिर्ज्ञेयं । कथंचित्राजर्षिपुरुमीढ
श्यत्विशेषितंतस्यनामदेगोत्रादेशेनाक्रियंतइति । गोधाघोषाविश्वावारास्त्रीनामकाताःसप्तविंशिकाऋषिकाब्रह्मवादिन्याःसमाप्तव
जमीढेत्रसस्यराजानाविनिमाप्तव्यं । अस्त्रियंस्त्रियावर्जयित्वेति । गोधाघोषाविश्ववारादिस्त्रीनामकाताःसप्तविंशिकाऋषिकाब्रह्मवादिन्याःसमाप्तव
जमीढेत्रसस्यराजानाविनिमाप्तव्यं । अस्त्रियंस्त्रियावर्जयित्वेति । इमंघोकशकुत्सआंगिरसत्वमित्यादि । एवंस्तुतस्यऋषे । गोत्रानुक्तोतमांगि
अपिच । अनुक्तगोत्रंयथात्वमग्नेद्युम्नाहिरण्यस्तूपआंगिरसत्वं अपिच । इमंघोकशकुत्सआंगिरसत्वमित्यादि । एवंस्तुतस्यऋषे । गोत्रानुक्तोतमांगि
अपिच । अनुक्तगोत्रंयथात्वमग्नेद्युम्नाहिरण्यस्तूपआंगिरसइतिश्रुतिः । तत्रानुक्तगोत्रंसहस्रशीर्षासूक्तंनारायणस्यगोत्रंनास्ति । त
रसत्वं उभयोर्निदर्शनंविधात् । जानीयादित्यर्थः । हिरण्यस्तूपआंगिरसइतिश्रुतिः । तत्रानुक्तगोत्रंसहस्रशीर्षासूक्तंनारायणस्यगोत्रंनास्ति । त
रसत्वं उभयोर्निदर्शनंविधात् । जानीयादित्यर्थः । मेत्स्यवकांसऋषिः ॥ वाक्यशब्दात्सूक्तस्यार्थेज्ञातव्या । यथाग्निमीळेमधुछंदाः । तथासयोष्टषावृस्के
द्विशेषितं । यथोपदेशासतिसंबंधादित्यर्थः । वाक्यशब्दस्याद्वितीयार्थः । यथाकयारउमान्नुकस्यत्वीषाद्य
भिरीत्यादिवार्षागिराःपञ्चपुत्राःएत्यत्त्वचइंद्रद्वस्तउक्थमित्यगिनिनिदर्शनं । वाक्यशब्दस्याद्वितीयार्थः । यथाकयारउमान्नुकस्यत्वीषाद्य
भिरीत्यादिवार्षागिराःपञ्चपुत्राः । एत्यत्त्वचइंद्रद्वस्तउक्थमित्यगिनिनिदर्शनं ।

२ आत्ममग्नकुषिरपिस्तस्यमानोदेवतंभवति २

२ प्राधान्येनस्तुत्वभक्त्यामंत्रस्तदेवएवसः । नैरुक्ताःस्वस्त्वपि यत्कामऋषिर्यस्मंत्रोत्सवतीति देवतासत्वप्रतिपादनपरेसंदेहात् ॥ यद्दैवंनास्ति हयेजायइत्यादिषुसंवादेषु २

॥ अन्योजनेस्वच्छंदोभिरुपधावन्। अत्रस्तुतिपूर्वकप्रार्थितं। दृष्टाहं युगदर्शनात्। देवतास्वरूपनिर्धारविषयेदमाह। ॥

यानेनोच्यतेसादेवता। सूक्तेनोच्यतेसादेवताइत्यर्थः। यथाग्निमीळेसूक्तं। तथात्व
५ युजोमरुतांवाक्यं। तथामहनन्नवतन्नाञुनोवाच्यमित्यनयोर्निदर्शनं। यातेनोच्यतेसादेवता। सूक्तेनोच्यतेसादेवताइत्यर्थः। यथाग्निमीळेसूक्तं। तथात्व
मग्नेप्रथमोअंगिराइत्यनयोर्निदर्शनं। यथावायवायाहिदर्शतेत्यवायुदेवतं॥ तथाप्रवीरयाशुचयोवायुदैवतमितिनिदर्शनं। चित्रंदेवानां। सूर्योनोदिवः
स्पातित्युभयोः सूर्यदैवतंनिदर्शनं। मितिसर्वत्रनिदर्शनं। एकाक्षरादैवीगायत्रीप्रभृतिचतुःशतमुत्कृतिपर्यंतान्यक्षरसंख्ययाछंदोवेदितव्यं। अथ
र्षिदैवतछंदसानांसंबंधमाह॥ ॥अर्थेप्सवऋषयोदेवताछंदोभिरभ्यधावन्॥ अर्थयतइतिफलं॥ अन्नधनपुत्रादिमोक्षांतं। तत्अर्थमात्माधीनं
सत्कर्मकर्तुमिच्छंतइति॥ तथोचोक्तं॥ अग्निमीळइत्यादि। मधुछंदःप्रभृतयोऋषयः। तथादेवताअग्निर्वायुःसूर्यइत्यादिसूक्तभागिनः। तथाछंदोगा
यत्र्यादिभिःउपायभूतैस्तद्यक्तमंत्रैःस्तुतिपूर्वकंप्रार्थनयाअभ्यधावन्प्रद्रुत्यागच्छन्। अहंदेवताउपधावामीतिश्रुतिः। प्रयोगदर्शनात्। यत्का
मऋषिर्यस्यांदेवतायामार्थपत्यमिच्छन्स्तुतिंप्रयुंक्तेचदैवतःसमंत्रोभवतीतिनैरुक्तवचनात्। तथायाद्यभगवद्वेदेवेभ्यःकरोतिताद्दगिवास्मैदेवाःकु
र्वंतीतिश्रुतिः। दृढनिश्चयःप्रासदंतइत्यर्थः। देवतास्वरूपमभ्यधावन्नितिप्रसंगात्देवताआह। ॥तिस्रएवदेवताः। क्षित्यंतरिक्षद्युस्थानाअग्नि ५
र्वायुःसूर्यइति॥ तिसृणांदेवतानां। त्रीणिस्थानानिवेदितव्यानि। अग्निःपृथिवीस्थानः। वायुरंतरिक्षस्थानः। सूर्योद्युस्थानः। तथाचश्रुतिः। अग्निर्गृहप
तिरितिहैकआहुः सोस्यलोकस्य। वायुर्गृहपतिरितिहैकआहुः। सोंतरिक्षलोकस्य। असौवैगृहपतिर्योसौतपतीतिक्रमयोगात्व्याहृतीःप्रस्तौतीति॥ अग्निभक्तिस्तवान्सर्वान्भावेनसमाप्येत। चंद्रप्रभृतिरिंद्रेसर्वेस्य
एवकारकरणंअवधारणार्थंतत्राप्यास्यसमास्तेवांतर्भवः। तत्रपृथ्वीस्थानानांअग्न्यादेवांतर्भावोद्रष्टव्यः। एवमुत्तरयोर्वर्गयोरिंद्रेसूर्येचतथाचोक्तं।
योनुसंभवातिः स्यादेतत्। कथमासांयोजातितांतर्भावगिहितआहो। स्वित्तिसृणांमेवेत्यत्राह ३

६ तासांअग्न्यादीनांयाःसमानस्थानोपथमोत्तममध्यमवर्गस्थाइत्यर्थः तासामेवविभूतयस्तिस्रएवयोगैश्वर्यात्। अनेकधाभवतीत्यर्थः। अथापिस्यात्। एकैकस्याः
किंरूपमिदइत्यतइदमुच्यते ६

एवंव्याहृतयःप्रोक्तव्यस्ताः। एवंप्रकारेणव्याहृतयोभूरादयस्त्रयोमंत्राव्यस्ताःपृथगुक्ताः। भूः। भुवः। स्वः। इतिमंत्रक्रमः। भूरग्निर्देवता। भुवोवायुर्देवता।
स्वःसूर्योदेवताइतिदेवताक्रमः॥ ॥समस्तानांप्रजापतिः॥ ॥भूर्भुवस्वरितिसमस्तानांप्रजापतिर्देवतेत्यर्थः॥ भूर्भुवस्वःस्वत्रयोवेदोसीनि॥ तथाभूर्भु
वःस्वरित्येताव्याहृतयइमेत्रयोवेदाइत्याधारण्यकश्रुतिः। आर्षंतुप्राजापत्यः। तुपबादाव्याहृतिमंत्राणांप्रजापतिऋषिरित्यनिर्देशः॥ ॥ॐकारःसर्वदेवत्यः॥
ॐमितिशब्दःसर्वदेवतात्मकःश्रुतिः। योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितइतितैत्तिरीयोपनिषत्॥ पारमेष्ठ्योवा॥ ॐकारःपरमेष्ठिनंवाभिधत्ते। परमोत्कृष्ट
स्थानेतिष्ठतीतिपरमेष्ठी। ब्राह्मोदैवआध्यात्मिकाः। ब्रह्मदेवत्योवा॥ ॐकारोदैवदेवत्योवाॐकारः। अध्यात्मशब्दः। शरीरवर्त्तिप्रत्यगात्माभिन्नोवाओंकारः
तथाअकारउकारोमकारइतिचानेकधाधासमस्तदेवतंदोभिप्रायःश्रुतिः। तत्स्थानाअन्यास्तद्विभूतयः। पृथिव्यादिस्थानभेदेनपठ्यमानाअन्यादेवतास्त्रि
स्तद्विभूतयः। अग्न्यादीनांविकृतयइत्यर्थः। देवतादिकांडत्रयंवर्त्तते। आद्यंनैघंटुककांडंद्वितीयंनैगमंतथा। तृतीयंदैवतंचेतिसमाम्नायस्त्रिधाम
तः। गोशब्दपारपर्यंतमाद्यंनैघंटुकंमतं। जहाक्लबदृशीसांतंनैगमंसंप्रचक्षते। अग्न्यादिदेवपत्न्यंतंदेवताकांडमुच्यते। इतिनैरुक्तेव्याख्याबोद्ध
व्या। ततःअग्न्यादिक्षितिस्थानदेवता। वाय्वाद्यंतरिक्षदेवता। सूर्यादिद्युस्थानदेवताइति। कर्मपृथक्त्वाद्धिपृथगभिधानस्तुतयोभवंति॥ तु
कर्मनानात्वात्देवतानामेवानहीतिनिश्चयेनानेकरूपाःसंति। वृत्रवधसमाश्रितरक्षणवर्षणदहनपवनद्योतनादिव्यापारभेदात्। तु
हहव्यप्रतियाहणायकालेनुजिघृक्षयासंप्रदानत्वमनुभवति। यद्वाकर्मपृथक्त्वात्जगद्व्यापारादित्यर्थः। पृथगभिधानंनामगुणसंकी

~अथेदानीं पारमार्थिकमेकत्वमभिधित्सन्नाह एव यैवं वा शब्दः पक्षव्यावृत्त्यर्थेनानात्वपक्षमोपन्नारिकं व्यावर्त्तयति महानात्मेति स सार्वात्मनो व्यावर्त्त्योऽतियोगैचरत्न रकुभाधकः सर्वात्मा अखिल
लोकनाथस्तस्य विशेषावस्थानमादित्यमंडलेइत्यर्थः ~
ने वेति॥ स्तुतिस्तस्य प्रभावो विभूतिं किं स्वोत्पत्तिं स्तसमधि केति। पृथक्स्तुतयो बहूत्वं पश्यन्ति तस्मादेवतास्सवंति॥ एवंतावदौपाधिकं नानात्वमुक्तं॥ एकैव वा
६ नं वेति॥ स्तुतिस्तस्य प्रभावो ... एकादेवतानातिस्रः तस्यनाम महानात्मेति श्रूयते। तस्यनाम महद्यश इति श्रुतिः। आत्मा वा इदमेक एवाग्र आसीदिति च। स
महानात्मादेवता॥ एकादेवता नातिस्रः तस्यनाममहानात्मेतिश्रूयते। तस्यनाममहद्यशइतिश्रुतिः। आत्मावाइदमेकएवाग्रआसीदितिच। स
एकः। सयएवंविदित्युपनिषत्। कः सइत्याह। योसौ चराचरबीजकुंभभूतः सर्वात्माखिललोकनाथस्तस्य विशेषावस्थानमात्मस्यमंडलमित्य
र्थः। सस्सूर्यइत्याचक्षते। सएकइतिवेदेविदोवदंति। एतंह्येव बह्वृचामहत्युक्थे मीमांसंत इत्यारण्यकश्रुतिः। अथोक्तमर्थमुपपादयति। स
हि सर्वभूतात्मा॥ सर्वभूतात्मेत्युक्तं। श्रूयते। यच्चकिंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा। अंतर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थित इति। दे
हि सर्वभूतात्मा॥ सर्वभूतात्मेत्युक्तं। श्रूयते। यच्चकिंचिज्जगत्सर्वंदृश्यतेश्रूयतेपिवा। अंतर्बहिश्चतत्सर्वंव्याप्यनारायणस्थितइति। दे
तिर्योपनिषत्। श्लोकः। भवद्भूतस्य भविष्यस्य जंगमस्थावरस्य च। अस्यैके सूर्यमेवैकं प्रभवं प्रलयं विदुः। असतश्च सतश्चैव योनिरे
षप्रजापतिः। यदक्षरं चाव्ययं च यदेतद्ब्रह्म शाश्वतमिति। तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेति॥ ॥ ऋषिणा कुत्सेन मंत्रेण वा तदर्थं
रूपमुक्तं॥ चित्रं देवानामुदगादनीकमिति मंत्रारण्यके। न योऽहं सोऽसौ योऽसौ सोऽहमिति तदुक्तमृषीणा सूर्य आत्मेति। तदुक्तं पुराणे। दिव्यं ज्योतिः
सलिलपवनैः पूरयित्वा त्रिलोकीमेकीभूतं पुनरपि च तत्सारमादाय गोभिः। अंतर्लीनो वससि विवस्वन्ध्वांतकृतं सूर्यमेनं तत्त्वप्राणेस्वमितिज
गतां प्राणस्त्वं सूर्यआत्मा॥ जगतो जंगमस्य नस्य नस्तुषः स्थावरस्येति। तद्विभूतयोन्यादेवताः देककांडत्रयं वर्णिन्यः सूर्य आत्मा॥ ६
~द्वयीहृदेवसंवागादिविभवावस्थापनानं तत्र पराशेषावशेषातीतां शब्दानभिलप्यां प्रापि विभवावस्थात्वनेकाधिकारस्वरूपानंतां तेन तेन भेदेनावस्थिता च यथामंडलविशेषेणावस्थाय संसार
यात्रां संपादयतीत्यत इदमुक्तं सस्सूर्य इत्याचक्षत इति।
२

जगतो जंगमस्य नस्तुषः स्थावरस्येति॥ तद्विभूतयोन्यादेवताः॥ व्यतिरिक्ताः अग्निर्वायुर्यावाद्यास्तद्विभूतयः तस्य सूर्यस्य विभूत इत्यर्थः। ।तदप्येतदृचोक्तं। तदि
तिवाक्योपन्यासः एतदर्थं मंत्रेवैव स्पष्टमुक्तं। कथमित्याह। इंद्रं मित्रं वरुणमग्निमाहुरिति॥ यथाभिधानं। तदुक्तं भिष्यामः। सर्वैरेव मंत्रगतदेवताभि
धानैः सएवाभिध्यायित इत्यर्थः। उभयंमात्मा दित्याक्ररित्युक्तं। इहच। रसमिद्रंय यातान्नमाप्नोतिहि स्तुवर्णेतां। एवमर्थोऽप्यनास्पष्ट इति वेदेन तु
ध्यते। सत्यं वेवागत्यास्पष्टो त्यत्रज्ञानं महर्षिभिर्ऋगुदाहरणं। देवतैकत्वं प्रतिपादनेनोक्तं। यद्यस्याभिधानमिंद्रादिभवंतेनैव स्तुतिभाजवाक्यमा
जहाविर्भाजा निपातभाजो वा। यथाशेपलक्ष्यत इति॥ यद्वा यथाभिधानं त्वेकेन सूर्यं त्वाद्येनात्रिभिरग्निर्वायुः सूर्यैकपदे शमंत्रैः क्रमेण प्रातिस्विकमुक्त
भिष्यामः। प्रायेणैंद्रेमरुतः। प्रायेणबाहुल्येनानिपातभाजो भवंति। इंद्रशब्दस्त्वच्यते। तद्विभक्तदेवतास्त्वयंतइत्यर्थः। तथा च श्रुतिः। आग्निरुपर्यैंद्रेमे
वातऊर्ध्वंछंदः। शस्यते तद्धि सर्वं मरुत्वतीयं भवतीति ब्राह्मणं। मरुद्भूतीय प्राप्तप्रणोर्थमंतरेणापि वचनं। राज्ञां नदान स्तुतयः प्रायेणैंद्र इत्यनुवर्त
ते। व्रतसंबंधिनो राजानः चकारात्व इंद्रमरुद्वधारणे। ततः विभिंदोर्दानं तुष्टाविज्यादौ विभिंदादीनां राज्ञत्वं विधीयते। अनुत्सारणार्थमैंद्रम
रुत्स्तुत इत्यर्थः। २। द्वितीयखंडः॥ अथ छंदांसि। अथेत्यधिकारार्थः। छंदांस्यधिकृतानि वेदितव्यानि क्रियंतीति वा। ।गायत्र्युष्णिगनुष्टुप्
बृहती पंक्तिस्त्रिष्टुब्जगत्यतिजगती शक्वर्यतिशक्वर्यष्ट्यत्यष्टी धृत्यतिधृत्यैतय इत्येतानि चतुर्दश छंदांसि गायत्र्याद्यातिधृत्यंतानि
शाकलसंहितायां पठ्यंते। कृत्यादीनां यथोक्तकारणमुपादर्शति। कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिरिति सप्त छंदांसि॥
~इयमापपरिसाधेवराज्ञां दानस्तोत्र अनुत्सारणार्थमैंद्रेस्तुते।

२ गायत्र्यादीन्येकविंशतेश्चतुरुत्तराण्येव हि चतुर्दशाक्षरसंतेः तत्राद्यसप्तवर्गसंस्कारं चतुरक्षरस्त्वच्यते। तत्त्वपादविशेषाभावाद्विशेषसंतानो। अक्षरसंख्यायैवाव्यवसायं फलः
कर्तव्यः। तत्रातिजगतीद्विपंचाशदक्षराणीत्यादि। २

८ उच्यते। कृतिः प्रकृतिराकृतिर्विकृतिः संस्कृतिस्तथा। षष्ठी चाभिकृतिर्नाम सप्तम्युत्कृतिरुच्यत इति श्रीसिंशाख्ये। तथा परिभाषायां॥ कृत्यादीनां स
प्तछंदसां निगदस्त्र मंत्राणामनुष्ठानमुपादेशाः। चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि॥ गायत्री चतुर्विंशत्यक्षरा तदादीनि क्रमेणोत्तरोत्तरं वृध्या च
तुरक्षराण्युच्यंते॥ उक्तं च। चतुर्विंशत्यक्षरा गायत्री २४ अष्टाविंशत्यक्षरा गायत्री उष्णिक् २८ द्वात्रिंशदक्षरा अनुष्टुप्। ३२ षट्त्रिंशदक्षरा बृहती
३६ चत्वारिंशदक्षरा पंक्तिः ४०॥ चतुश्चत्वारिंशदक्षरा त्रिष्टुप्॥ ४४॥ अष्टाचत्वारिंशदक्षरा जगती॥ ४८॥ एतानि सप्तछंदांसि गायत्र्यादिजगत्यंतान्यार्षसंज्ञ
कानि॥ अथातिजगत्यादिक्रमोच्यते॥ द्विपंचाशदक्षरा अतिजगती ५२॥ षट्पंचाशदक्षरा शक्करी ५६ षष्ट्यक्षरा अतिशक्करी ६० चतुःषष्ट्यक्षरा अ
ष्टी॥ ६४ अष्टषष्ट्यक्षरा अत्यष्टी ६८ द्विसप्तत्यक्षरा धृतिः ७२ षट्सप्तत्यक्षरा अतिधृतिः ७६ तत्रातिजगत्याद्यतिधृत्यंतान्यार्षसंज्ञकानि॥
एतानि सप्तछंदांस्यतिशब्दरकांतरं छंदः पिंगलोपि पठ्यते॥ पिंगलसूत्राण्युच्यंते॥ धृत्यष्टिशक्करीजगत्यः पृथक् पृथक् पूर्वत एतान्येवैषां द्वि
तीयं द्वितीयमिति ततः॥ इति त्रीणि सप्तकानि उदाहरणानि॥ अथ कृत्यादीनां सप्तछंदसामक्षरसंख्यामाह। अशीत्यक्षरा कृतिः ८० चतुरशीत्य
क्षरा प्रकृतिः ८४ अष्टाशीत्यक्षरा आकृतिः ८८ द्विनवत्यक्षरा विकृतिः ९२ षण्णवत्यक्षरा संकृतिः॥ ९६ शताक्षरा अभिकृतिः १०० च
तुःशताक्षरा उत्कृतिः १०४ तत्र शाविशाख्योक्तं। अशीतिश्चतुरशीतिरष्टाशीतिर्द्विनवतिः। षण्णवतिः शतं पूर्णमुत्तमा तु चतुःशतं। एत ८

सप्तछंदांस्यार्षसंज्ञकानि भवंति। कृत्यादीनामुपसर्गयोगेनज्ञेयं। भण्यते॥ चतुःशतमुत्कृतिः। चतुरश्चतुरस्त्यजेदित्युक्तेः। तान्येभिः संख्याभ्यः कृतिः॥
प्रकृत्यादीनुपसर्गवर्जितद्वितीयत्वारिंशत्केपिंगलेन व्याख्याते॥ एतानि गायत्र्यादीन्येकविंशतिछंदांसि कृत्यंतानि यथाक्रमेण यथासंख्येन वेदितव्यानि॥
अथ छंदः प्रशंसा॥ छंदो नारायणः। छंदः पुरुषइति श्रुतिः। गायत्रं छंदः परमात्मसरूपमिति तैत्तिरीयोपनिषत्॥ तथा बृहती सहस्रस्य संपन्नस्य षट्त्रिंश
तमक्षराणां सहस्राणि भवंति तावंति पुरुषायुषेति प्रशंसा॥ अपि च॥ तस्योष्णिग्लोमानि त्वग्गायत्री त्रिष्टुप् मांसमनुष्टुप् स्नावान्यस्थि जगती पंक्तिर्म
ज्जा प्राणो बृहतीति छंदोपासनारण्यकश्रुतिः। तथा गायत्र्यौ स्विष्टकृतः संयाज्ये कुर्वीतेति सप्तछंदांसि जगत्यंतानि स्विष्टकृतः संयाज्याप्रत्येकं
छंदसां फलप्रशंसा॥ ब्राह्मणश्रुतिः॥ छंदांसि छादनादिति नैरुक्ते॥ छंदः गायत्री॥ दैव्येकं॥ आसुरी पंचदश॥ प्राजापत्याष्टा इत्यादि पिंगलव्याख्या
तत्त्वादि नानाभेदनानारूपनानाभिधानसप्तछंदस्स्वेवमेव॥ अथ गायत्र्यादिसप्तछंदसां देवताभिधीयंते॥ तथा च श्रुतिः। अग्नेर्गायत्र्यासवितुर्गे
त्यादि सप्तछंदसां देवतानिदर्शनानि॥ तथा स्वरवर्णगोत्राणि सप्तछंदसां पिंगलेनोक्तं। अथ छंदोविशेषमाह॥ ऊनाधिकेनैकेन निचृद्भु
रिजौ। गायत्र्याद्युत्कृत्यंतान्येकेनाक्षरेणोनानि निचृद्भवंति तथान्येकेनाक्षरेणाधिकमायथाक्रमेण निचृत्। भुरिक् वेदितव्या। ततः नि
चृदुदाहरणं। वरिवोधातमो भव इति त्रयोविंशत्यक्षरान्निचृत्गायत्री भवति॥ अपि च॥ भुरिक् उदाहरणं। विद्वांसाविद्दुरः पृच्छेदित
पंचविंशत्यक्षरा भुरिक्गायत्री भवति॥ द्वाभ्यां विराट्स्वराजौ। गायत्र्याद्युत्कृत्यंतानि द्वाभ्यामक्षराभ्यामूना विराट्गायत्री भवति। अपि च द्वाभ्यामक्षरेणाधिक स्व

२ धुवाकुलीत्व। इयांहित्रिभिरष्टनाविराळेन शौनकस्येववचनात्॰ चतुर्भिरपियदिस्यात्॰ यथानंतरव्यूहाभावात्॰ तथात ॥ २

३ अविराड्रूपत्वपिघतंनपूर्वमित्याद्ः ३

राड्गायत्रीभवति। अथविराड्गायत्र्युदाहरणं॰ यः१उकइवरस्यईइत्यक्षद्वाविंशत्यक्षराविराड्गायत्रीज्ञेया। तथा। स्वराड्गायत्र्युदाहरणं॰ जोषासवि
तर्यस्यतेहरइत्यक्षरष्टाविंशत्यक्षरास्वराड्गायत्रीज्ञेया॰। एवमेवोष्णिहादिष्वप्यूहनीयं। तानिनिचृत्भुरिक्तथाविराट्स्वराट्सर्वछंदसांनिदर्शनं॰॥
श्लोकः। यास्कस्याभिप्रायेणवह्वोपिगायत्र्योहीनतांगताः॥ अक्षरैर्बहुभिस्तास्तुगायत्र्याइतिधारयेदिति॥ पादपूरणार्थंतुक्षेप्रसंयोगेकाक्षरी पाद
भाषानूव्यूहेत्॥ क्षेप्रसंयोगोयकारवकारसंयोगः॰ पादपूरणार्थंव्यूहेत्॥ एकाक्षरंविसृजेदित्यर्थः। पादः इत्यादिपूरणाइतिहसूत्रेपिंगलानि
दर्शनं॰ तत्राक्षरसंयोगःश्लिष्टाभिहितोनादिसंधयःप्रातिशाख्येपदिष्टाः। समाक्षरेसंस्थानइत्येवमादिना। अथाभिनिहितःसंधिरितिच॥
एषैवंव्यूहः तथातत्सवितुर्वरेण्यमितियकारंव्यूहेत्॥ उत्तरयोर्व्यूहोनकर्तव्यः। अगोह्यस्ययदसस्तनागृहेइत्यत्रद्वयोरेकस्यैवव्यूहेत्। पादपूरणाति
द्वेद्वितीयस्योहोनकर्तव्यः। इत्येकाक्षरीभावस्योदाहरणं। नवाएकेनाक्षरेणछंदांसिवियंतिनद्वाभ्यामिति॥ ५ ॥ आद्येतुसप्तवर्गेपादविशेषा
संज्ञाविशेषास्तानानुक्रामंतएवोदाहरिष्यामः॥ ॥ गायत्र्यादिजगत्यंतेपादविशेषात्। तथापादाअक्षरादिसंज्ञास्तदविशेषाश्चभवंति॥ यथा
पदपंक्तिपादयोरेतमर्चेतिपादसंज्ञाभवंति॥ यथापंक्तिपदापंक्तिः प्रसिद्धिः तत्रमन्येत्वायज्ञियमित्यत्रतुयदाविराट्पंक्तिभेदःसंज्ञाभवंति
सप्तछंदांसि॥ अनुक्रामंतएवोदाहरिष्यामोदर्शयिष्यामइत्यर्थः॥ विराड्रूपाविराट्स्थानाश्चबहूनाअपित्रिष्टुभएवेत्युद्देशः। त्रिष्टुप्रूपतु
स्वत्वात्रिंशदक्षराश्चाद्येसप्तविंशद्भिरक्षरैन्यूनहीनाविराड्रूपाविराट्स्थानाश्चेतित्रिष्टुबधिकारेचकास्त्रिष्टुभएवस्युः। तत्रविराड्रूपा

५ एवंतावत्द्वितीयाचर्गःसोत्रएकत्वोनारब्धातः ५

विराट्स्थानाश्चपादसंज्ञाविशेषामाह॥ उक्तंप्रभाषोदाहरणं॰ नवकौवैराजत्रैष्टुभौश्चद्वौवावैराजोनवकश्चैष्टुभश्चविराट्स्थानेकादशिनस्त्रयोष्टक
श्चविराड्रूपेति॥ उभयोःसंततमुदाहरणंतेन॥ तत्रविराट्स्थानानवकौवैराजत्रैष्टुभश्चेत्युदाहरणं॰॥ तत्रैकोनचत्वारिंशत्॥ एकचत्वारिंशत्
इतिपंचभिश्चतुर्भिस्त्रिभिरक्षरैन्यूनाः अथनात्रिष्टुभएवेत्यर्थः। किमर्थमिदमुच्यते। असत्यभिन्याग्रेह्येकोनचत्वारिंशतोनिन्द्रातांकिं॥ एकचत्वा
रिंशतोसुरेक्षपंक्तिरेवचस्यादत्युद्देशः। उक्तंचअक्षराण्यवसर्वत्रनिमित्तंबलवत्तरं॥ विद्याद्विज्ञातिपन्नानांपादद्वाक्षरैन्यूनामितिशौनकवचना
त्॥ अनयोर्विराड्रूपाविराट्स्थानयोर्विज्ञातिपन्नापादत्वात्॥ स्यन्नस्तुतइत्यादिषुपंक्तित्वानिवृत्त्यर्थमिदंवचनं॥ तत्राद्यसप्तकेगायत्र्या
दिजगत्यंतेवक्ष्यमाणंवेदितव्यं। नोत्तरसप्तकेवक्तुंशक्यतेतत्रप्रयोगानास्ति॥ तेनातिजगत्याद्यातिधृतिरित्यंतेयथाध्ययनपारंपर्येण
क्षरपादव्यवस्थेति। सिद्धंवेदितव्यं॰ अनादेशेष्टाक्षराःपादाइतिहइत्याचार्यपारंपर्योपदेशादध्यापनंकर्तव्यइत्यर्थः। तत्रद्वरेकाक्षरपाद
दशाद्वादशाएकादशाक्षरस्यत्रैष्टुभसंज्ञाक्षराणांवैराजत्रैष्टुभजागताइतिसंज्ञाः। परिभाषयापादसंज्ञाक्रमेणोक्ताः। दशाक्षर
स्यवैराजसंज्ञाः। एकादशाक्षरस्यत्रैष्टुभसंज्ञाः। द्वादशाक्षरस्यजागतसंज्ञाइति॥ अत्रपिंगलेनउक्तं॥ विराजोदिशाः। त्रिष्टुभो
रुद्राः। जगत्याआदित्याइतिनिदर्शनं॥ तथाचश्रुतिः। दशाक्षराविराट्। एकादशाक्षरात्रिष्टुप्॰ द्वादशाक्षराजगतीतियथोप

शेनपादाभिप्रायेणवेदितव्यं॥ अनादेशेष्टाक्षराःपादाः॥ = अक्षरसंख्यानुक्तौपादाअष्टाक्षराभवंति॥तत्रेदमुपस्थितंबोद्धव्यं। यत्र
९ पादाक्षरसंख्यानोच्यते॥तत्रसर्वत्रानादेशेष्टाक्षराःपादाइत्यर्थः॥ अष्टाक्षरागायत्रीतिश्रुतिः॥ गायत्र्यावसवइतिपिंगलानिदर्शनं।
चतुष्पादाश्छंदः॥ = अनादेशइत्येव। ऋत्तः॥ चतुर्भिःपादैर्युक्ताभवंति। तत्रद्वितीयमनुष्टुप्चतुष्पादाश्छंदइत्यनादेशइत्यर्थः॥ ३॥
तृतीयखंडः॥ प्रथमंछंदस्त्रिपदागायत्री = एकविंशतिछंदसामादिभूतंगायत्री॥छंदोविहितं॥ तत्रभगवद्गीतावाक्यं॥ गायत्रीछंदसामहमिति
ऊक्तेः॥ प्रधानभूतंगायत्रीगायतेस्तुतिकर्मणइतिनैरुक्ते॥त्रिपदापादत्रययुक्तागायत्रीसाष्टाक्षरैरनादेशात्त्रिभिःपादैर्वर्त्तते। प्रागुक्तेहे
गायत्रीप्रथमभेदः॥तस्योदाहरणं। तत्सवितुर्वरेण्यं। ८। भूहः॥ भर्गोदेवस्यधीमहि। ८। धियोयोनःप्रचोदयात्॥ ८। इत्यादिचतु
र्विंशत्यक्षराः॥गायत्रीसंज्ञाज्ञेया। साचतुर्विंशत्यक्षरातिस्रोगायत्रीमीलित्वा॥ आर्षगायत्रीसंज्ञाज्ञातव्या॥तिस्रोगायत्रीरूप
माह। दैवीगायत्रीआसुरीगायत्री॥ प्राजापत्यागायत्रीतितिस्रोगायत्रीवेदितव्या॥ एवंप्रकारेणोष्णिहाद्युक्तान्येकविंशतिछं
दसामार्षसंज्ञानीत्यर्थः॥ अथतिस्रोगायत्र्युदाहरणं॥ तत्रदैवीगायत्र्येकाक्षरा। तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहीत्यासुरीगायत्रीपं ९
चदशाक्षरी॥ धियोयोनःप्रचोदयादिति प्राजापत्यागायत्र्यष्टाक्षराश्चेतितिस्रोगायत्र्युदाहरणानि॥ एवमेवोष्णिहाद्युक्तंतान्यार्षसं

ज्ञासर्वत्र॥ शक्त्यनुष्टुभामार्षइतिपिंगलः॥ अथगायत्रीद्वितीयोदाहरणं॥ अग्निमीळेपुरोहितं ८ यज्ञस्य०जं। ८। होतारंरत्नधातमं ८ अथगा
यत्रीद्वितीयभेदः॥ पंचकाश्चत्वारषट्कश्चैकश्चतुर्थश्चतुष्कोवापदपंक्तिः॥पंचाक्षराश्चत्वारःपादाः॥षडक्षरश्चैकः॥ चतुर्थश्चतुरक्षरोविकल्पे
न। मासुरिकपदपंक्तिः॥गायत्री॥नाम॥तस्योदाहरणं· अग्नेतमद्य।५। अश्वं·मैः।५ क्रतुंनभद्रं·५ हृदिस्पृशं। ४ ऋ· हैः॥ ६ इतिशौनकम
तेअग्नेतमद्येतिपदपंक्तिर्गायत्रीनाम। अपिच। पिंगलमतेअग्नेतमद्येतिनागीगायत्री।नामभेदः॥ शौनककौषट्कश्चनागीतिसूत्रं। तस्य
द्वितीयोदाहरणं। अग्नेत·मैः·९ क्रतुंन·शं·९ ऋ·हैः। ६ आद्यौद्वौपदौनवाक्षरौ· तृतीयःपादःषडक्षरश्च· नागीगायत्री पिंगलमतेनसिद्धं
पुनःपदपंक्तिरुदाहरणानि। अधाह्यग्ने। भूहः॥५ क्रतोर्भद्रस्य।५ दक्षस्यसाधोः।५ रथीर्ऋतस्य।५ बृहतोबभूथ।५ पुनःएभिर्नोअर्कैः ५ भवानोअर्वा
ङ्।५ स्वर्णज्योतिः भूहः॥५ अग्नेविश्वेभिः ५ स्वमनाअनीकैः ·५। पुनः। अभिष्टेअद्य।५ शुचिहिरण्यं ५ तन्नेरुक्मान। ५ रोचतस्वधावोगीर्भि
र्गृणंतः॥५ अग्नेदाशेम। ५ प्रतोदिवान ५ स्तनयंतशुष्मैः। ६ पुनः। घृतन्नपूतं·५ तनूररेपाः ५ शुचिहिरण्यं ५ तत्तेरुक्मान। ५ रोचतस्वधावः॥
६ तवस्वादिष्ठेयंबिनाग्नेतमद्येत्याद्येताःपंचर्चःपदपंक्तिरासुरिकागायत्रीतथापदपंक्तिःस्वराट्गायत्रीयथाक्रमेणज्ञेया। पदपंक्तिः॥ पंचेतिपिंगलः
अथगायत्रीद्वितीयभेदः॥ षट्सप्तदशैकादशैकादशा उष्णिग्गर्भा॥ प्रथमपादः। षडक्षरः। द्वितीयपादःसप्ताक्षरः। तृतीयः एकादशाक्ष
रश्च। सोष्णिग्गर्भागायत्रीनाम। तस्योदाहरणं· तामेवअश्वानां। भूहः॥ ६ हरीणामितोशानां· ७ उतोनु·सा ११ भूहः॥ अथगायत्री

चतुर्थभेदः। यत्रयः सप्तकाः पादनिचृत् क्रमेणत्रयः पादाः सप्ताक्षराः। सापादनिचृत्गायत्रीनाम। तस्योदाहरणं। युवाकुहिशुरी
१० नां।७।स्त्वया०ग्रां।७।पुनः अभीषुणः सखीनां।७।अविताजरितॄणां।७।शतं०भि०।७।कानि त्रिपादा षड्भिः। सापादनिचृदिति हेतुस्त्रे पिंगलः
अथगायत्रीपंचमभेदः। मध्यमः षट्कश्चेद्इतिनिचृत्। आद्यंतौ पादौ सप्ताक्षरौ। मध्यमः पादः षडक्षरश्च। साऽतिनिचृद्गायत्री
नाम। तस्योदाहरणं। पुरूतमं पुरूणां।७।स्तो०वि०६ राजे०तां।७ तत्र कारिका। आद्यपादात्तृतीयश्च सप्तको मध्यमो यदि। षडक्षरः सा
विज्ञायागायत्र्यतिनिचृदिति। अथगायत्रीषष्ठभेदः। दशकेश्चेत्यवमध्या। आद्यंतौ पादौ सप्ताक्षरौ॥ मध्यमपादो दशाक्षरश्च। सायवमध्या
गायत्रीनाम। तस्योदाहरणं। सस्कन्वेयोवसूनां ७ योरायामानेतायइडानां।१०सोमो०तीनां।७ कारिका। आद्ये पादे तृतीये च सप्तके मध्य
मो यदि। दशाक्षरः सगायत्रीयवमध्या प्रकीर्तिता। विपरीता यवमध्येति पिंगलः। अथगायत्रीसप्तभेदः। यस्यास्तु षट्कसप्तकाष्ट
काः सावर्द्धमाना। प्रथमः पादः षडक्षरः द्वितीयः पादः सप्ताक्षरः तृतीयपादोष्टाक्षरश्च। सावर्द्धमाना गायत्रीम। तस्योदाहरणं
ईशानावार्याणां।६ क्षयंतीश्चर्षणीनां।७ अपो०जं०८। पुनः शुत्वमग्नेयज्ञानां।६ होताविं०७ देवे०ने०८ षट्सप्तकाष्टकैर्वर्द्धमानेति १०
पिंगलः। एकाक्षरवृध्याइत्यर्थः अथगायत्र्याष्टमभेदः। विपरीता प्रतिष्ठा। प्रथमपादोष्टाक्षराः द्वितीयः सप्ताक्ष०त० षडक्षरः॥

साप्रतिष्ठागायत्रीनाम॥ तस्योदाहरणं॥ आपः पृणीत भेषजं॥८॥वरू०मम॥७॥ज्योक्च सूर्यं दृशे॥६॥पुनः त्वमग्ने व्रतपा असि ८।देव ऽर्त्येष्वा
बृहः०७ त्वं यज्ञेष्वीड्यः बृहः।६। विपरीता प्रतिष्ठेति पिंगलः। अथगायत्रीनवमभेदः। द्वौ षट्कौ सप्तकश्चेद् ह्रीसीयसी॥ आद्यौ पादौ षडक्षरौ। तृती
यपादः सप्ताक्षरश्च। ह्रीसीयसी गायत्रीनाम। तस्योदाहरणं। प्रेष्ठमु प्रियाणां ६ स्तुह्यासावातिथिं ६ अग्निं०थं।७ पुनः इंद्रः सहस्रदाव्नां
वरु०नां०६ क्रतु०स्तत्थः।६। त्रिकल्पेन पादव्यत्यासेन ह्रीसीयसीगायत्री ज्ञेया॥ अथपिंगलानुसारेण गायत्रीदशमभेद उच्यते॥ षट्सप्तकयोर्मध्ये
ष्टावतिपादनिचृत्॥ प्रथमः पादः षडक्षरः द्वितीयपादो अष्टाक्षरः तृतीयपादः सप्ताक्षरश्च सातिपादनिचृत्गायत्रीनाम। तस्योदाहर
णं। प्रेष्ठं वो अतिथिं।६ स्तुषे०प्रियं०८ अग्निं र०थं७ इदमुदाहरणं परिभाषानुक्रमेण्यां नास्ति। पिंगलदर्शनमित्यर्थः। इति पादविभागे
न दशगायत्र्यईरिताः॥ ४ चतुर्थखंडः॥ ॥द्वितीयमुष्णिक्छन्दः त्रिपदास्यो द्वादश॥ द्वितीयं छंद आर्ष्योष्णिक्नाम॥ अधिकृतं प्रागानुष्टुभो
धिकारात् सा त्रिपदा वक्तव्या। इति उष्णिक्प्रथमभेदः। आद्यौ पादौ वनादेशादष्टाक्षरौ॥ तृतीयपादो द्वादशाक्षरश्च। सोष्णिक्नाम। तस्योदाहर
णं। य इंद्र सोमपातमः।८। मदः०चेतति।८। येनाहंसिन्यत्रिणं०महे। बृहः१२ पुनः यस्य त्यच्छंबरंमदे।८। दिवोदासाय रंधयः।८। अयं सवो
०व।१२ कारिका। आद्यावष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः इति। उष्णिग्गायत्रो जागतश्चेति पिंगलः। अथोष्णिक्द्वितीयभेदः॥ आद्य
श्चेत्पुर उष्णिक्। आद्यपादो द्वादशाक्षरः॥ द्वितीयतृतीयौ वनादेशादष्टाक्षरौ। सा पुर उष्णिक्नाम। तस्योदाहरणं। तत्र अप्स्वंतर्देवा हविष्यं शुक्रमुद्व

११ रत्न।१२ पश्येम शरदः शतं ८ । जीवेम० तं ८। पुनः ये अंजि षु नवः।१२। स्वक्षरुक्मेषु रवादिषु ८ । भ्रा० स्रा ८। कारिका। आद्यौ द्वादशकः पाद
अन्त्यावष्टाक्षरौ यदा। पुरउष्णिगिति प्रोक्ता तत्र स्वस्तिरुदाहृतिः। पुरउष्णिक् पुरइति पिंगलः। अथोष्णिक्तृतीयभेदः। मध्ये भश्चेत्ककुप्॥ प्रथ
मतृतीयपादावष्टाक्षरौ॥ द्वितीयपादो द्वादशाक्षरश्च। सा ककुबुष्णिक्नाम। तस्योदाहरणं। स देवः समहासति। ८। सुवीरो० त्यः
सूहः।१२ सं त्रायध्वे० ते। ८ पुनः युष्माकं स्मारथाँ अनु। ८ मुदे दधे० वः।१२ वृष्टी० व। ८। कारिका॥ द्वादशाक्षरके मध्ये त्वष्टकत्र भितो यदि।
सोष्णिक् ककुबिति प्रोक्ता स देवः समहासति। ककुं मध्ये चेदंत इति पिंगलः॥ अथोष्णिक् चतुर्थभेदः। । त्रैष्टुभजागतश्चतुष्काः ककुम्न्यंकु
शिरा॥ प्रथमपाद एकादशाक्षरः॥ द्वितीयपादो द्वादशाक्षरः। तृतीयपादश्चतुरक्षरश्च। सा ककुम्न्यंकुशिरोष्णिक् नाम। तस्योदाहरणं। द
दीरेक्ष्णस्तन्वे ददिर्वसू।११। ददिर्वाजिनं।१२। नूनमथ।४। कारिका। एकादशाक्षरस्त्वाद्यो द्वितीयो द्वादशाक्षरः। चतुष्को यो ऽन्तियस्याः
सा ककुम्न्यंकुशिरा मता॥ अथोष्णिक् पंचमभेदः। एकादशिनोः परः षट्कस्तनुशिरा। आद्यौ द्वौ पादावेकादशाक्षरौ। तृतीयपादः ष
डक्षरश्च। सा तनुशिरोष्णिक् नाम। तस्योदाहरणं। प्रयाघोषे भृगवाणेन शोभे।११॥ यथा वा० वां।११॥ प्रेष युर्न विद्वान्। कारिका। एकाद
शाक्षरावाद्यौ तृतीयश्चेत्षडक्षरः। यस्याः सैषा तनुशिरा प्रयाघोषेत्युदाहृतिः। प्रयातनुशिरानामेति प्रातिशाख्ये। अथोष्णिक् षष्ठभेदः ११
मध्ये चेत्पिपीलकमध्या॥ प्रथमतृतीयपादावेकादशाक्षरौ॥ मध्यमपादः षडक्षरः सा पिपीलिकमध्योष्णिक् नाम। तस्योदाहरणं।

हरीयस्य सयुजा विव्रता वेः।११॥ अर्वंतानुशेपा।६। उभा० रन्।११ पुनः वज्रं यश्चक्रे सुहनाय दस्यवे।१२ हिरीम० मान्।६ अरुत० रजः।११ कारिका। ए
कादशाक्षरः षट्कः पुनरेकादशाक्षरः। सा पिपीलिकमध्योक्ता हरीयस्येत्युदाहृतिः। त्रिपादणिष्ठमध्यापिपीलिकमध्येति पिंगलः। वज्रं यश्चक्रे स
र्वोष्णिक् ज्ञेया॥ अथोष्णिक् सप्तमभेदः। आद्यः पंचकस्त्रयो ऽष्टका अनुष्टुब्गर्भा। । प्रथमपादः पंचाक्षरः॥ शेषास्त्रयः पादा अष्टाक्षराः
सानुष्टुब्गर्भोष्णिक् नाम। तस्योदाहरणं। पितुं नु स्तोषं ५ महोध० मी० ८। यस्य त्रितो व्योजसा वृत्रं ८। वृत्रं विपर्वमर्दयत्। ८। कारिका। आद्यः
पंचाक्षरः पादस्त्रयस्त्वष्टाक्षराः परे॥ अनुष्टुब्गर्भेति सा प्रोक्ता पितुं नु स्तोषमित्यृचा। अनुष्टुब्गर्भानामैषा सा गस्त्यस्ति पितुन्विनि प्रातिशा
ख्ये। अथोष्णिक् अष्टमभेदः चतुःसप्तगोष्णिगेव। चत्वारः पादाः क्रमेण सप्ताक्षराः स पोष्णिक् शुद्धा। तस्योदाहरणं। नदं व ओदतीनां
७ नदं यो युवतीनां।७ पतिं वो अघ्न्यानां धूनः।७ धेनू० सि ७ पुनः मंसीमहि त्वा वयं।७ अस्मा० पूषन्।७। मती० नम्र।७ विश्रा० धनं।७ मं
सीमहीति नित्यं तु उष्णिक् ज्ञेया। नदं मंसीमहीति चेति। प्रातिशाख्ये। कारिका। अनुष्टुप्पादसाम्येन युदं वा दोय सुष्णिहः। रहस्यब्राह्मणे ऽप्येवं
सम्यगाम्नायते खलु। तत्र चोष्णिह उद्दिष्टाः सम्यक् पादैतिसामगः। पादैश्चतुर्भिः सैवोक्ता नुष्टुप्गुणसंयुता। नदं व ओदतीनां मिति युष्णि
कगक्षरे भवत्यनुष्टुप्पादैरयुवोष्णिगिति श्रुतिः। चतुष्पादपिभिरिति पिंगलः। कारिका। चतुर्भिः सप्तकैः पादैर्युक्ता प्युष्णिगिहोच्यते।
कगक्षरे भवत्यनुष्टुप्पादैरायुवोष्णिगिति श्रुतिः। चतुष्पादपिभिरिति पिंगलः। कारिका। चतुर्भिः सप्तकैः पादैर्युक्ताप्युष्णिगिहोच्यते।
नदं व ओदतीनां तु मंसीमहीत्युदाहृतिः।५। पंचमखंडः॥ तृतीयमनुष्टुप्। आद्यहत्यादार्षानुष्टुब्धिकारः। चतुर्भिः पादैर्युक्ता अना

देशोष्टाक्षराश्चतुष्पादाश्चर्चेइत्यनुवर्तत इति॥ अथानुष्टुप्प्रथमभेदः तस्योदाहरणं॥ गायंतित्वागायत्रिणः ८॥ अर्चंत्यर्कमर्किणः ८॥ ब्रह्मा०
१२ कतो०८। उद्वं०मिरे॥ ८॥ पुनःउरोष्टइंद्रराधसः ८॥ त्रिवी० कतो॥ ८॥ अधा०ध्वचर्षणे। ८। कम्नासः सत्रमंहय॥ ८॥ कारिका॥ चतुर्भिरष्टकैःपा
दैर्युक्ताअनुष्टुब्विहोच्यते॥ गायंतित्वागायत्रिणउरोष्टइत्युदाहृतिः॥ चनुष्टुप्गायत्रैरितिपिंगलः॥ अथानुष्टुप्द्वितीयभेदः॥ पंचपंचकाःषट्
श्चैकोमहापदपंक्तिः॥ क्रमेणपंचपादाःपंचाक्षराः॥ अंत्यपादःषडक्षरश्च। सामहापदपंक्तिरनुष्टुप्नाम॥ तस्योदाहरणं। ददस्वादिष्टा ५॥
अग्नेसंदृष्टिः ५॥ इदा०क्रः ५इदा० क्तोः ५॥ श्रियेरुक्मोन॥ ५॥ रोच० केः६॥ कारिका॥ पंचपंचाक्षरायस्याःषट्कश्चैकः षळक्षरः। सोक्तामहा
पदपंक्तिस्तत्वस्यादिष्टेत्युदाहृतिः। अथानुष्टुप्तृतीयभेदः। जागताविष्टकश्चकृतिः॥ आद्यौद्वौपादौद्वादशाक्षरौ॥ तृतीयपादोष्टाक्षरश्च
सःकातरनुष्टुप्नाम॥ तस्योदाहरणं॥ माकस्मैधातमभ्यमित्रिणेनः१२ माकुत्रा०गुः ब्रूहः१२ स्तनाभु०रवीः ८। ब्रूहः॥ कारिका॥ द्वादशाक्षरावाद्यौतु
तृतीयोष्टाक्षरः कृतः॥ माकस्मैधातमित्येषाकृत्यनुष्टुबुदाहृतिः॥ त्रिपात्कृतिजागताभ्यांगायत्रेणचेतिपिंगलः। अथानुष्टुप्चतुर्थभेदः म
सौ ध्यमेवेदष्टकःपिपीलिकमध्या॥ आद्यौद्वौपादौद्वादशाक्षरौमध्यमपादोष्टाक्षरश्च। सापिपीलिकमध्या। तस्योदाहरणं। पर्यूषुप्रधन्व०ये।
ब्रूहः१२ परिष्वत्ता॥ पिसक्षणिः ८। द्विषस्तरध्याऋणयानईयसे। १२ यस्याद्वादशकस्याद्यामध्येष्टद्वादशाक्षरौ। सापिपीलिकमध्योक्तापर्यूषु १२
इत्युदाहृतिः। मध्येंतेच। त्रिपादानेष्टमध्यापिपीलिकमध्येतिसूत्रेपिंगले॥ अथानुष्टुभः पंचमभेदः नवकयोर्मध्येजागतः विकाराट्।

आद्यंतौपादौनवाक्षरौमध्यमपादोद्वादशाक्षरश्च। साकाविराट्कनुष्टुप्नाम। तस्योदाहरणं॥ तांवद्वांसाहवामहेवां ९ तानो०मघ०१२ आर्च०कुः ९
कारिका॥ नवाक्षरोद्वादशकोपूर्वेववत्पुनरेवनेव। इतिपादास्त्रयोयस्यास्तांविद्वांसेतिकाविराट्। तांविद्वांसेतिकाविराट्कितिशातिशास्त्रे॥ अथानु
ष्टुप्षष्ठभेदः नववैराजत्रयोदशीनष्टरूपी। आद्यपादौनवाक्षरः। द्वितीयपादोदशाक्षरः। तृतीयपादोक्षाबोरशाक्षरश्च। सानष्टरूपानुष्टुप्नाम।
तस्योदाहरणं॥ विश्वाभिपाक्ष२ नदेवान्। ९। वृष०दस्या॥ १०॥ पानंत०सोनः१२ कारिका। नवाक्षरोदशाक्षरस्त्रयोदशाक्षरस्तथा। इतित्रयो
हियत्रैव नष्टरूपाहिसास्मृता॥ नष्टरूपाविश्वाभीतिग्रातिशास्त्रे॥ अथानुष्टुप्सप्तमभेदः॥ दशाक्षरास्त्रयोविराट् क्रमेणत्रयःपाददशाक्षराः॥ सा
साविराळनुष्टुप्नाम। तस्योदाहरणं॥ दिवोचामाभिंद्रमंदतुत्वा१०। यंतेकषावहयेस्वाद्रिः ब्रूहः१० मोतु० नार्वा। १० दशाक्षराविराळितिश्रुतिः। अथानु
ष्टुप्अष्टमभेदः॥ एकादशात्वा। क्रमेणत्रयःपादाएकादशाक्षराः॥ साविक्रान्तविराळनुष्टुप्नाम। तस्योदाहरणं। अभिंनरोदीधितिभिररण्योः।
११ हस्त०स्तं। ११ हरदशं०युं११॥ कारिका। दशाक्षरास्त्रयःपादायस्याःसाहिविराड्भवेत्। एकादशाक्षरायस्यास्त्रयःसापिविराड्भवेत्।
त्रिपात्रैष्टुभैरितिपिंगलः॥ विराट्स्याभिष्टुस्वर्गलोकंयजातित्रयस्त्रिंशदक्षरेषवतइतिब्राह्मणश्रुतिः। ६। षष्ठखंडः॥ चतुर्थंबृहतीत्वतो
योद्वादश। चतुर्थंछंदोबृहतीनाम्। आपंक्तेरार्षबृहत्यधिकारः। अथबृहती प्रथमभेदः। प्रथमाद्वितीयचतुर्थपादाअनादेशादष्टाराः
तृतीयपादोद्वादशाक्षरश्च। सार्षबृहतीनाम। तस्योदाहरणं। अयंतेअस्तुहर्यतः। ८। सोम०कृतः। ८। जुषाण०गहि। १२। आति०रथं।

८॥ कारिका॥ आदितोष्टाक्षरौ पादौ तृतीयो द्वादशाक्षरः। चतुर्थोष्टाक्षरश्चांते बृहती खलु वै भवेत्। बृहती जागतस्त्रयश्च गायत्राइति पिं
१३ गलः। अथ बृहती द्वितीयभेदः॥ आद्यश्चेत्पुरस्ताद्बृहती। आद्यपादो द्वादशाक्षरः॥ शेषास्त्रयः पादा अनादेशादष्टाक्षराः। सा पुरस्ताद्बृहती
नाम। तस्योदाहरणं॥ महांयस्य विनः शवसो असाम्या॥ बृहः महेन॰ त्वजिः। ८। भर्त्तावज्रस्य धृष्णेः। ८। पिता पुत्रमिव प्रियं। ८। पुनः। अधी
त्वत्रसमातं चसम्ब॥ बृहः॥ १२॥ सद्योदि॰ तान्वः। बृहः। सद्यो दिद्दिष्ट पार्थ्यैः बृहः ८॥ सेधो॰ मायवः। ८॥ कारिका॥ द्वादशाक्षरपादो
चेदष्टकाश्चापरे त्रयः पादा यस्या हि सा प्रोक्ता पुरस्ताद्बृहतीति वै॥ पुरस्ताद्बृहती पुरइति पिंगलः। अथ बृहती तृतीयभेदः। द्वितीयश्चेन्न्यंकु
सारिणी॥ प्रथमतृतीयचतुर्थपादा अनादेशादष्टाक्षराः। द्वितीयपादो द्वादशाक्षरश्च। सान्यंकुसारिणी बृहती नाम। तस्योदाहरणं। एतं शं
समिंद्रास्मयुष्टं। भुरिक्। ८। कूचिद्॰ ध्येय॰। सदा॰ ध्येये॥ बृहः मेदतां॰ सो॰। ८। न्यंकुसारिणी॥ द्वितीयाइति पिंगलः। उरोबृहती वा। विकल्पे
न उरोबृहती नाम। तस्योदाहरणं॥ तृष्टमेतत्कटुकमेतत्। भुरिक्। ८। अपाष्ठा॰ त्र्वे। १२॥ स्यैयोब्रह्मा विघात्। बृहः। सइद्वाध्यमर्हति। ८॥
उरोबृहतीयास्कस्येति पिंगलः। स्कंधोग्रीवी वा॥ १२॥ विकल्पेन स्कंधोग्रीवी बृहती नाम। तस्योदाहरणं। मत्स्यपायितेमहः। बृहः। ८॥ पात्रस्ये॰
मदः। १२। इषाते॰ इंदुः अन्त्विवः। ८। वाजीतमः। ८। स्कंधोग्रीवी। क्रौष्टुकइति पिंगलः। कारिका। आदितोष्टाक्षरः पादो द्वितीयो द्वादशाक्षरः॥ १३
पादा वप्याष्टकौ सोक्ता त्रिभिरेव तु नामभिः। ऋषीणां मतभेदो हि नाम्नस्तेदेतु कारणं। पिंगलपमते त्वियं महर्षे न्यंकुसारिणी। स्कंधोग्रीवीक्रो

ष्टुके श्च यास्कस्योरोबृहत्यपि। एकस्य त्रीणि नामानि प्रत्येकमुदाहरणं। त्रय आचार्यमतइति वेदितव्यं॥ अथ बृहती चतुर्थभेदः। अंत्यश्चेदुपरिष्टाद्बृ
हती। प्रथमद्वितीयतृतीयपादा अनादेशादष्टाक्षराः। चतुर्थपादो द्वादशाक्षरश्चेत्। सोपरिष्टाद्बृहती नाम। तस्योदाहरणं। नतमंहो न दुरितं। ८। देवाः
॰र्त्यः। ८। सजोष॰ मा। ८। मित्रोन॰ द्विषः। १२। कारिका। आदितस्त्वष्टका यस्यास्त्रयोंत्या द्वादशाक्षरा। उपरिष्टाद्बृहत्येषा नतमंहउदाहृतिः। उपरि
ष्टाद्बृहत्यंतइति पिंगलः। अथ बृहती पंचमभेदः। अष्टिनो मध्यदशकौ विष्टारबृहती। प्रथमचतुर्थपादावनादेशादष्टाक्षरौ। द्वितीयतृतीय
पादौ दशाक्षरौ स्या विष्टारबृहती नाम। तस्योदाहरणं। युवं वास्तं महोरन्। बृहः। ८। युवं वा युं नरतं तं सतं। १०। ताना बल्वस्कगोपास्यातं॰ १० पा
तं॰ चोः। ८। कारिका॥ यद्यष्टाक्षरयोर्मध्ये पादौ स्यातां दशाक्षरौ। विष्टारबृहती सोक्ता युवं वास्तमुदाहृतिः। वैराजो गायत्रो चेति पिंगलः। अथ बृहती
षष्ठभेदः। त्रिजागतोर्ध्वबृहती॥ क्रमेण द्वादशाक्षरास्त्रयः पादाः। सोर्ध्वबृहती नाम। तस्योदाहरणं॥ भजीजनो अमृतमर्त्येष्वा। बृहः १२
ऋतस्य॰ रणः। १२। सदा॰ ष्पदत्। १२ कारिका। त्रयो द्वादशका यस्याः सा होर्ध्वबृहती विराट्। त्रिभिर्जागतैर्महाबृहतीति पिंगलः। अथ बृहती
सप्तमभेदः। त्रयोदशिनो मध्येष्टकः पिपीलिकमध्या॥ आद्यंतौ पादौ त्रयोदशाक्षरौ। मध्यमपादोष्टाक्षरश्च॥ सा पिपीलिकमध्या वि
राड्बृहती नाम। तस्योदाहरणं। अभिवो वीरमंधसो मदेषु गाय १२ गिरा महा विचेतसं। ८। इंद्रं ना॰ यथा। १२ कारिका॥ यद्यष्टाक्षरो

मध्येत्रयोदशकयोर्गिते॥ सापिपीलिकमध्योक्ता बृहती द्वित्रयोदशात्॥ त्रिपाद्निष्ठमध्यापिपीलिकमध्येति पिंगलः॥ अथ बृहत्याः ष्टमभेदः॥ अथ बृ
१४ हत्यष्टमभेदः॥ नवकाष्टैकादश्यष्टिनो विषमपदा॥ प्रथमपादे नवाक्षरः॥ तृतीयपाद एकादशाक्षरः॥ द्वितीयचतुर्थपादावष्टाक्षरौ। साविषमपादा
बृहतीनाम॥ तस्योदाहरणं॥ सनितः सुसनितरुग्र॥९। चित्र·चेता ८। श्रा·हंतं ११॥ शुज्मंवा·वों। बृहः ८। कारिका। नवाक्षरो ष्टाक्षरश्च तथैवैका
देशाक्षरः॥ चतुर्थोष्टाक्षरश्चेति पादा यस्याः सा स्मृतः सेत्यते॥ अथ बृहतीनवमभेदः॥ चतुर्नवकाद्बृहत्येव। क्रमेण चत्वारः पादा नवाक्षराः। तस्यो
दाहरणं॥ तंत्वा वयं पितेव चोभिः ९। गावोन ९ दिम। ९ देवं ९ दं। बृहः ९ अस्म ० मादं ० बृहः ९ कारिका। चतुर्भिर्नवकैः पादैर्युक्ता पि बृहती मता पि। क
चिन्नकोवःश्चत्वार इति पिंगलः॥ ७। सप्तमः खंडः॥ पंचमं पंक्तिः पंचपदा॥ आत्रैष्टुभः पंक्त्यधिकारः। पंचमछंदः पंक्तिर्नाम। क्रमेण पंचपादा अ
नादेशाद ष्टाक्षराः॥ सा पंक्तिर्नाम। तस्योदाहरणं। इंद्रो मदाय वावृधे। ८। शवं ८ नृभिः ८। तमि ० जिषु। बृहः ८ उत ० महे। ८। सवा ० षत।
८ पथ्यापंचभिर्गायत्रैरिति पिंगलः॥ पंचपदा पंक्तिराशिश्रुतिः॥ अथ पंक्तेर्द्वितीयभेदः॥ अथ चतुष्पदा विराड्दशकैः॥ अथेत्यधिकारेतेनो वि
राड्दशकैरित्यादौ चतुर्भिः पादैरित्यादिसंबंधः सवतः। क्रमेण चत्वारः पादा दशाक्षराः। सा चतुष्पदा विराट्पंक्तिर्नाम। तस्योदाहरणं। म
न्वे वां यज्ञियं यज्ञियानां। १० मन्ये ० तानां ० १० मन्ये ० केतुं १० मन्ये ० णीनां ० १०। पुनःक्षिपप्रो राहिमायुस्यद्दहः। १० पुरो ० दर्दः। १० स्कदा ० १४
स्वयं ० १० ऋजि ० षेदात्। १० कारिका। चतुर्भिर्दशकैः पादैः क्रमेणैव तदुच्यते। विराट्पंक्तिः सा प्रोक्ता मन्येत्वा तीक्ष्णदाहृतिः॥ अथ पंक्तेस्तृती

यभेदः॥ अयुजौ जागतौ सतो बृहती॥ प्रथमतृतीयपादौ द्वादशाक्षरौ॥ द्वितीयचतुर्थपादा व नादेशाद ष्टाक्षरौ। सतो बृहती पंक्तिर्नाम। तस्योदाह
रणं। मावेराधांसि मा तऊतयो वसो १२। अस्मा·भन्। ८। विश्वा·नुष १२। वसनि ० म्यआ। ८॥ कारिका। तृतीयाद्यौ द्वादशकौ द्वितीयांत्यौ तथाष्टकौ। य
स्याः सतो बृहत्येव मा वेराधांस्युदाहृतिः॥ पूर्वौ चेद्युजौ सतः पंक्तिरिति पिंगलः॥ तथा सतो बृहतीतां डिनइति। अथ पंक्तेश्चतुर्थभेदः॥ युजौ चे
द्विपरीता॥ द्वितीयचतुर्थपादौ द्वादशाक्षरौ॥ प्रथमतृतीयपादौ चनादेशाद ष्टाक्षरौ॥ सा विपरीता पंक्तिर्नाम। तस्योदाहरणं। यत्र
ध्वः श्रावयत्सखा॥ ८। विश्वेत्ता ० द्युतः॥ १२। तं विश्वे·युगा॥ ८। इंद्रं ० स्कचः १२। कारिका॥ द्वितीयांत्यौ द्वादशकौ त्वतीयाद्यौ तथाष्टकौ। यस्याः
सा विपरीतेति नाम्नोक्ता वह्निः चेत्तेमे॥ विपरीतौ चेदिति पिंगलः॥ अथ पंक्तेः पंचमभेदः॥ आद्यौ चेत्प्रास्तारपंक्तिः॥ आद्यौ द्वौ पादौ द्वाद
शाक्षरौ॥ सा प्रस्तार पंक्तिर्नाम। तस्योदाहरणं· अग्रेभिर्द्रद्रिक्षणवत्सरस्वती। १२ अक·वती·१२ गृणाना·वतु। ८ स्कवाना ० ष्टवतु।
८॥ कारिका। पादौ द्वादशकावाद्यावंत्यावष्टाक्षरौ परौ॥ यस्याः सा प्रस्तारपंक्तिरग्ने भिरिदित्कदाहृतिः॥ प्रस्तारपंक्तिः पुरत इति पिंगलः
अथ पंक्तेः षष्ठभेदः॥ अंत्यौ चेदास्तारपंक्तिः॥ तृतीयचतुर्थपादौ द्वादशाक्षरौ॥ प्रथमद्वितीयपादावनादेशाद ष्टाक्षरौ। सा ऽस्तार
पंक्तिर्नाम। तस्योदाहरणं। अभिन्नवद्यक्तिभिः। बृहः ८। होतारं·वृणीमहे। ८। यज्ञायस्तीर्ण·मदे·१२ शीरं·विवक्षसे ० १२॥ कारिका

आद्यावष्टाक्षरौपादौततोद्वादशकौपरौ॥यस्याआस्तारपंक्तिःस्यादाग्निंनसेत्वकदाहृतिः॥आस्तारपंक्तिःपरतइतिपिंगलः॥अथपंक्तेःसप्तम
१५ भेदः॥आद्यांत्यौनेत्संस्तारपंक्तिः॥प्रथमश्चतुर्थपादौद्वादशाक्षरौद्वितीयतृतीयपादावनादेशादष्टाक्षरौ॥सासंस्तारपंक्तिर्नाम॥तस्योदाह
रणं॥पितुष्टनोनतंतुमित्कदानवः॥१२॥प्रति॰मसि॰।८।उषा॰स्तमः।८।संव॰ता।१२॥कारिका।द्वादशाक्षरयोर्मध्येपादावष्टाक्षरौ
यदि।यस्याःसंस्तारपंक्तिःस्यात्पितुष्टतोनतंतुमित्।संस्तारपंक्तिर्बहिरितिपिंगलः॥तत्रसंस्तारपंक्तिरुदाहरणमित्यस्यार्थः॥आयाहि
वनसासहेनाद्विपदाःशंसतीतिब्राह्मणं।तथायाहिसंवर्चउषस्यंद्वेपदमितिद्विपदासूक्ते।पितुष्टतइत्येषासंस्तारपंक्तिः॥छंदःपठ्यते॥
कथमिदंचतुष्पादुदाकृयते।उच्यते।द्वाद्विपदाहृचः।समामनंतीति।द्विद्विपदयोरध्यापनेएकर्चत्वमतैवंवक्ष्यते।तेनचतुष्पात्त्वमित्य
दोषइति।अथपंक्तेरष्टमभेदः॥मध्यमौचेद्विष्टारपंक्तिः॥द्वितीयतृतीयपादौद्वादशाक्षरौ॥प्रथमश्चतुर्थपादावनादेशादष्टाक्षरौ॥
साविष्टारपंक्तिर्नाम॥तस्योदाहरणं।अग्नेतवश्रवोवयः।८।महि॰वसो॰॥१२॥बृहद्भानोशवसा॰छंदं॰बृहत्॥१२॥दधासि॰दा॰वेव।८।का
रिका।यस्यास्त्वष्टकयोर्मध्येभवेतांद्वादशाक्षरौ॥विष्टारपंक्तिःसाप्रोक्ताअग्नेतवेत्यकदाहृतिः॥पविष्टारपंक्तिरंततइतिपिंगलः॥८॥ १५
अष्टमखंडः॥षष्ठंत्रिष्टुप्त्रैष्टुभपादा॥आजगत्याद्वार्षत्रिष्टुबधिकारः॥त्रैष्टुभमितनादेशादष्टाक्षरानिष्ट्युत्यर्थं।पादश्चत्वारएव

अनादेशाच्चतुष्पदाश्चैवइति।चत्वारएकादशकास्त्वपादायस्याःसोक्ताःत्रिष्टुबाचार्यैर्विशिष्टैः॥अथार्षत्रिष्टुप्प्रथमभेदः॥तस्योदाहरणं॥पिबासो
ममियमुग्रतर्दः॥११॥ऊर्वं॰इंद्र॥११॥त्वियो॰हस्त॥११॥वरवो॰शवोभिः॥११॥एकादशाक्षरात्रिष्टुबितिस्मृतिः॥अथत्रिष्टुब्द्वितीयभेदः॥द्वौतुजागतौयस्याः
सजागतेजगतीत्रैष्टुभेत्रिष्टुप्॥यस्याछंदसोद्वौपादौद्वादशाक्षरौ।तथाद्वौपादावेकादशाक्षरौतावुभौसद्विजागतेजगतीत्रैष्टुभेत्रिष्टुबितिज्ञेयं॥अ
थजागतेजगत्युदाहरणं।सोम्नितुष्ठिर्यृथ्याउस्वायसचा॥बृहत्॥१२॥इंद्रःहुवे।१२॥अवेव॰मधु॰॥११॥उदिह्॰वनं॥११॥तथात्रैष्टुभेत्रिष्टुबुदाहरणं।सनेमि
चक्रमजरंविवावृते॰उत्ताना॰हंति॥११॥सूर्यस्य॰वृत्तं॰॥११॥तस्मिन्न॰विश्वा॰बृहत्॥१२॥एतेद्वेऋचावुदाहरणंबोद्धव्यं॥तत्रजागतेजगतीत्रैष्टुभेत्रिष्टुबितिवि
शेषपरसूक्तेउदाहरणानि॰।इमंस्तोमीयंसूक्तं।तथामानोमित्रोवरुणइतिसूक्तमितिद्वेसूक्तेजागतत्रैष्टुभसहेनाभिश्रितंबोद्धव्यं।एवंसर्वत्र।कार
का।यस्यद्वादशकौपादावन्यावेकादशाक्षरौ।त्रिष्टुप्जगतस्सप्तकस्थाःसोच्यतेजगतीतिवे।अथत्रिष्टुप्जगतीभेदः।वैराजौजागतौचाभिसारि
णी॥आद्योद्वौपादौदशाक्षरौ॥तृतीयश्चतुर्थपादौद्वादशाक्षरौ।साभिसारिणीत्रिष्टुब्नाम।तस्योदाहरणं।योवाचाविवाचोमृध्रवाचः॥१०॥पुरू
॰धाम॰॥१०॥तच्चादि॰मसि॰१२॥पिते॰रावः॥१२॥कारिका।यस्यादशाक्षरौपादौततोद्वौद्वादशाक्षरौ॥सोक्ताभिसारिणीत्रिष्टुब्योवाचाचैत्स्यदा
हृतिः॥अथत्रिष्टुप्चतुर्थभेदः॥नवकौवैराजत्रैष्टुभश्च।आद्यौपादौनवाक्षरौ॥तृतीयपादोदशाक्षरः।चतुर्थपादएकादशाक्षरश्च॥से
यंविराट्स्थानात्रिष्टुप्नाम।तस्योदाहरणं।स्वस्तिनइंद्रोवृद्धश्रवाः॥९॥स्वस्ति॰वेदाः॥९॥स्वस्ति॰नेमिः॥१०॥स्वस्ति॰धातु॰बृहत्॥११॥अथ

द्वैधा॥ द्वैधाशब्दात् विकल्पेन द्वितीयभेदो विराट्स्थाना स्यात्॥ वैराजो नवकस्त्रैष्टुभश्चैव॥ आद्यौ द्वौ पादौ दशाक्षरौ। एकोनवाक्षरः। एकएकाक्ष
१६ रश्च। तस्योदाहरणं। श्रुधीहवमिंद्रमारिषण्यः १० स्याम सूनो १० इमा यंति। भुरिक्। १० वसु रंतः ११। सा विराट्स्थानाय थाज्ञानेन बोद्धव्या॥
अस्य सूक्तस्य परिभाषाक्रमो नास्ति। इति विराट्स्थाना द्विको प्रराज्ञेया। कारिका। त्र्यस्या नवाक्षरो पादो द्वितीयो दशकस्तथा। एकादशाक्षरोन्त्य
श्च विराट्स्थानानुसामतेति। स्वस्ति न इंद्रः अपि च॥ अथ त्रिष्टुप्पंचमभेदः। एकादशिनस्त्रयोष्टकश्चेत् स विराड्रूपा। क्रमेण त्रयः पादा एकाद
शाक्षराः। चतुर्थपादोष्टाक्षरश्च। सा विराड्रूपा त्रिष्टुप् नाम॥ तस्योदाहरणं। वृष्यं श्चोतंत्याध्रिगो शचीवः। बृहः ११ स्तोकासो तस्य ११ कवि
नागाः ११॥ हव्या० धिर ८॥ कारिका॥ एकादशाक्षरा यस्याः पादास्तु त्रय आदितः। चतुर्थश्चाष्टकः सोक्ता विराड्रूपेति बह्वृचैः। अथ त्रिष्टुप् ष
ष्ठभेदः। द्वादशिनस्त्रयोष्टकश्च ज्योतिष्मती। क्रमेण द्वादशाक्षरास्त्रयः पादाः चतुर्थ पादोष्टाक्षरश्च सा ज्योतिष्मती त्रिष्टुप् नाम। तस्योदाहरणं। अ
ग्निनेंद्रेण वरुणेन विष्णुना १२ आदित्यै० भुवः १२ सजो० णव। बृहः १२। सोमं पि० ना। ८। कारिका। यस्या द्वादशिनः पादास्त्रयः पश्चात्तु नाष्ट
कः। एषा ज्योतिष्मती त्रिष्टुप् उत्तरत्र स्फुटा ह्यतः। इत्युपरिष्टाज्ज्योतिः। अथ त्रिष्टुप् सप्तमभेदः। यतोष्टकस्ततो ज्योतिः। सर्वे ज्योतिःश
ब्दा व्यक्तं चे। स्पंते। यतोष्टकस्तस्यार्थः। यत्र यत्र ज्योतिःशब्दा वाच्यस्तत्र तत्र बोद्धव्यः। तत्र ज्योतिःशब्दः पिंगलेनाहतः। एकेन त्रिष्टुप् ज्योति १६
ष्मती। तथा जगत्येकेन। पुरस्ताज्ज्योतिः प्रथमेन। मध्येज्योतिर्मध्यमेन। उपरिष्टाज्ज्योतिरंत्येनेति। तथा जगत्येकेन। चरस्त्रैर्व्यंरियातः

एतस्य पृथक् पृथक् उदाहरणानि॥ अथ पुरस्ताज्ज्योतिरुदाहरणं। मह्यमद्भिम्मेयः पोषि ८। बृहस्पतिः पुर एतातेअस्तु। बृहः १२ अथेमवरस्पव
र आपृथिव्याः। बृहः १२। अरेशत्रून्कृणुहि सर्ववीरः। बृहः १२। इत्याश्वलायनसूत्रे तथा वेदांतरे बोद्धव्यं। अथ द्वितीयपादो मध्येज्योतिरुदाह
रणं। यद्वायज्ञं मनवे संमिमिक्षथुः १२। एवेत्का० तं ८। बृह० कुवे १२। इंद्रा० षसा। १२॥ पुनः ताभिरयातं वृषणोपमेहवं १२। विश्व वार्यं। निधि
त्। ८। इमामंहिष्ठारा। १२। याभिः क्रिविं० गतं १२॥ इति द्वितीयदो पादोष्टाक्षर उदाहरणं। अथ मध्येज्योतिस्तृतीयपादोष्टाक्षरमुदाहरणं। श
दिव्या आपः पृथिवि संवत्सरं १२ याअंत वीर्याः। बृहः १२॥ हिरण्य याः ८। ता न आपः० वंतु। बृहः १२। इति तृतीयपादो मध्येज्योतिर्ग्रहस्तत्रे वेदांत
रइति। अथ त्रिष्टुप् अष्टमभेदः। चत्वारोष्टका जागतश्च महाबृहती। क्रमेण पादाश्चत्वारः पादा अष्टाक्षराः पंचम पादो द्वादशाक्षरश्च। साम
हाबृहती त्रिष्टुप् नाम। तस्योदाहरणं। नवानां नवतीनां निवृत्तः ८। विषस्य रोपुषीणां। बृहः ८। सर्वो नाम ८। आरे योजनं। बृहः ८। ह
रिष्ठामधुत्वामधुलाचकार। १२। इत्येते द्वादशाक्षरो महाबृहत्युदाहरणं। अथादितो द्वादशाक्षरो महाबृहत्युदाहरणं। नमो वाके प्रस्थि
ते अध्वरे नरा १२। विव तये। ८। आया गतं ८। अनस्फ० कुवे। ८। धत्तं शुभे। ८। इत्यादितो द्वादशाक्षरो पादो महाबृहती इति। कारिका।
चत्वारोष्टाक्षराः पादाः पंचमो द्वादशाक्षरः। यस्यास्तु सोन्त्यतेनाम्ना सा महाबृहतीति वै। अत्रापि क्रमो न विवक्षितः। तेनादितो द्वादशाक्षरं

ततोद्वादशिकान्नासिध्यतीत्यर्थः। अथत्रिष्टुप्नवमभेदः। मध्येचेद्यवमध्या। आद्यौद्वौपादावष्टाक्षरौ। अंत्यौद्वौपादावष्टाक्षरौ। मध्यमपादे
द्वादशाक्षरश्च। सायवमध्यामहाबृहतीत्रिष्टुप्नाम। तस्योदाहरणं। संमातपंत्यभितः। व्यूहः। ८। सपत्नी॰शंवः। ८। मृषेन॰माध्यः। व्यूहः
१२। स्तोता-नो। ८। वित्तं-सी ८। कारिका॥ आदावष्टाक्षरौयस्यात्द्वितीयोद्वादशाक्षरः। पुनर्द्वावष्टकौचेत्स्याद्यवमध्याप्रकीर्तिताद्वति। अस्य
द्वितीयोदाहरणं। बृहाद्भिरग्नेअर्चिभिरिति। अथत्रिष्टुप्दशमभेदः। आद्यौदशकावष्टकास्त्रयः पंक्त्युत्तराविराट्पूर्वावा। आद्यौद्वौपादौ
दशाक्षरौ। शेषास्त्रयः पादाअष्टाक्षराः। सापंक्त्युत्तरात्रिष्टुप्नाम। सैवाविकल्पेनविराट्पूर्वानाम। तस्योदाहरणं। एवंह्याग्नेस्यामहावि
हव्यं। १०। श्रृयं-द्रभिः। १०। नास्यारिष्टुश्रवोबृहत्। ८। रयिं-तां। ८। इषं-घृतं। ८। कारिका। आद्यौदशाक्षरौयस्यास्त्रयश्चाष्टाक्षराःपरे। पंक्त्यु
त्तराविराट्पूर्वेतस्याद्वेनामनीइमे॥ ९॥ नवमखंडः॥ सप्तमंजागतीजागतपादा॥ सप्तमंछंदोजगतीनामवेदितव्यं। आप्रगाथेत्यआ
र्षजगत्यधिकारः। क्रमेणद्वादशाक्षरैश्चतुर्भिःपादैरनादेशात्चतुष्पदाश्चर्चइत्यनुवर्त्तते। अथार्षजगतीप्रथमभेदः। तस्योदाहरणं। प्र
देवमच्छामधुमंतइंदवः। १२। असि-नवः। १२। बर्हिषदो-भिः। १२। परिष्कृ-धिरे। १२। इमं पुनः। इमंस्तोममर्हतेजातवेदसइति द्वितीयोदाहरणं। का
रिका। यस्याःपादास्तुचत्वारोद्वादशाक्षरसंयुताः। जगतीनामसाप्रोक्ता इमंस्तोममुदाहृतिः। अथजगतीद्वितीयभेदः। अष्टिनस्त्रयःस्यैनद्वौ

महासतोबृहती॥ अष्टाक्षरास्त्रयःपादाः। द्वादशाक्षरौस्यैतद्वौपादौ। सामहाबृहतीजगतीनाम। तस्योदाहरणं। आयःपप्रौताभानुनारोदसीउभे। १२। धूमे-दि
वि। ८। तिरश्चर्योरवा। व्यूहः। १२। श्यावास्व-वृषा। व्यूहः। ८। श्याव-वृषा। ८। एतस्यपरिभाषानुसारेपादक्रमोनास्ति। कारिका। महासतोबृहत्यकासा
नात्रोक्तक्रमादरः। आयःपप्रौभानुनेतिद्वितीयाद्योद्विजागताविति। तत्रस्वात्मीयेजागताविल्यर्थः। अथजगतीद्वितीयभेदः। अष्टकौसप्तकःषट्को
दशकोनवकश्च। आद्यौद्वापादावष्टाक्षरौ। एकःसप्ताक्षरः। एकःषडक्षरः। एकोदशाक्षरः। एकोनवाक्षरश्च। सामहापंक्तिजगतीनाम। त
स्योदाहरणं। स्तोर्यौविषमासजामि-द्दांतं-गृहे। ८। सोन्विन्नुनमराति। ७। नोवरा-राम-। ६। आरे। रिद्यः। १०। मधुत्वा-कार। ९। कारिका। अष्टावष्टा
क्षरौयस्याःसप्तकेत्वषडक्षरः। दशाक्षरश्चनवकःसामाहापंक्तिरुच्यते। अथजगतीचतुर्थभेदः। षडष्टाकावामहापंक्तिः। विकल्पेनषट्पादाः
क्रमेणाष्टाक्षराः। तस्योदाहरणं-उभेयदिंद्ररोदसी। ८। आपप्रा-इव। निष्टवा। ८। महांतं-नां-निष्टवा। ८। संम्रा-नां। निष्टवा। ८। देवी-नूव। ८। भद्रा
नव। पुनः अवद्धकेअवान्निकेतिषडष्टकोद्वितीयोदाहरणं। कारिका। अष्टाक्षरावायस्याःषट्सामहापंक्तिरेवहि। अवद्धकेअवान्निकाउभेयदिंद्र
रोदसी। जगतीषड्भिरितिपिंगलः। कारिका। इतिछंदांसिसप्तकेह्व्याख्यातानिविशागराः। एतच्छंदोन्वयपुवांसंज्ञावक्तुंकिंभवेत। १। इति
दशमखंडः॥ अथप्रगाथाः॥ सूक्तसंख्यानुवर्त्तनइत्येतस्मात्प्राक्प्रगाथाअधिक्रियंते। अथप्रगाथाथनांप्रथमभेदः। बृहतीसतोबृह
बार्हतः। तत्राद्यकबृहती। द्वितीयकंसतोबृहती। एतेह्रस्वौभिकिलैकेबार्हतप्रगाथोभवति। तस्योदाहरणं। मान्विदन्यद्विशंसतविद्वहवी

१८ अवक्रक्षिणंवृषभमितिप्रगाथोभवति॥सबार्हतप्रगाथोज्ञेयः।इवाःप्रगाथाइतिसूत्रकारः।अथप्रगाथस्यद्वितीयभेदः।ककुप्चेत्पूर्वाकाकुभः।तत्राद्यर्च
ककुबुष्णिक्।द्वितीयर्क्सतोबृहती।एतेद्वेऋचौमीलित्वैकःकाकुभःप्रगाथोभवति।तस्योदाहरणं।त्वयसुत्वाभपूर्व्यीतककुबुष्णिक्।उपत्वाकर्मन्नूतयेस
नोयुवेतिसतोबृहती॥सकाकुभप्रगाथोज्ञेयः।अथप्रगाथस्यतृतीयभेदः।महाबृहतीमहासतोबृहत्यौमहाबार्हतः।तत्राद्यर्क्महाबृहती॥
द्वितीयर्क्महासतोबृहती॥एतेद्वेऋचौमीलित्वैकोमहाबार्हतप्रगाथोभवति।तस्योदाहरणं।बृहद्भिरग्नेअर्चिभिरितिमहाबृहती॥विश्वासांगृ
हपतिर्विशामसीतिमहासतोबृहती।समहाबार्हतप्रगाथोज्ञेयः।अथप्रगाथस्यचतुर्थभेदः।बृहतीविपरीतेविपरीतोत्तरःप्रगाथोभवति।
तत्राद्यर्क्बृहती।द्वितीयर्क्विपरीतायुजौचेत्पंक्तिः।एतेद्वेऋचौमीलित्वैकोविपरीतोत्तरःप्रगाथोभवति।तस्योदाहरणं।नहितेशूरराधसइतिबृह
ती।यत्रक्वचित्थावयत्सरेवतिविपरीतापंक्तिः।सविपरीतोत्तरःप्रगाथोज्ञेयः।अथप्रगाथस्यपंचमभेदः।अनुष्टुप्गायत्र्योश्चानुष्टुभोनुष्टुम्मुखाःस्त्वचाद्य
त्स्वे।तत्राद्यर्क्अनुष्टुप्।द्वितीयातृतीयेगायत्र्यौ।सअनुष्टुम्मुखःप्रगाथोभवति॥तस्योदाहरणं।आत्वारथंयथोतयइत्यनुष्टुप्।तुविशुष्मतुविक्रतो
इति।यस्यतेमहिनामहइत्येतेद्वेऋचौगायत्र्यौ॥एषस्त्वेकोनुष्टुम्मुखःप्रगाथोज्ञेयः।एवंप्रगाथाःसर्वत्रेत्यर्थः।अत्रशास्त्रेअनुष्टुम्मुखाः
स्त्वचाइत्युक्तेसति।आनुष्टुभःप्रगाथःप्रत्येतव्यः।इतिगायत्र्यादिजगत्यंतान्याद्यसप्तकेवर्गभेदइत्युक्तः।द्वितीयोत्तरसप्तकेवर्गेअतिज १८
गत्यादिसप्तछंदांस्यतिधृत्यंतानि।अक्षरसंख्ययोदाहरणान्यधिक्रियंते।यथापारंपर्येणपादावसानंवेदितव्यं।अथातिजगत्युदा

हरणं॥प्रवोमहेमतयोयंतुविष्णवइत्यतिजगतीज्ञेया॥अथशक्वर्युदाहरणं॥प्रोष्वस्मैपुरोरथमितिशक्वरीज्ञेया॥अथातिशक्वर्युदाहरणं॥स्कधामाया
तमाद्भिर्मित्यातिशक्वरीज्ञेया॥अथाष्ट्युदाहरणं॥त्रिकद्रुकेषुमहिषोयवाशिरमितिअष्टीज्ञेया॥अथात्यष्ट्युदाहरणं॥अग्निंहोतारंमन्येदास्वंतमित्य
ष्टीज्ञेया॥अथधृत्युदाहरणं॥ससर्वृसरतायमप्स्वैवद्वृत्वेतिधृतिर्ज्ञेया।अथातिधृत्युदाहरणं॥साहिशर्द्धोनमारुतंतुविष्वणिरित्यतिधृतिर्ज्ञे
या॥अतिजगत्यादीनामतिधृत्यंतानांसप्तछंदसांपादसंज्ञाभेदसंज्ञानास्ति॥शिष्टपारंपर्येणाध्येतव्यं॥अथकृत्युदाहरणं॥पराङ्ध्वर्यावाङ्वे
समत्पद्मर्दपितामातरिश्वाछिद्रापद्मधादछिद्रेक्थाकत्यःशंसत्सोमोविश्वाछन्नीथानिनेषद्बृहस्पतिरुक्थामदानिशंसिषद्वागायुर्विश्वमायुःकइदंशं
सिष्यतिसइदंशंसिष्यतीति।८०॥अथप्रकृत्युदाहरणं॥सूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतां।यद्रात्र्यापापमकार्षंमनसावा
चाहस्ताभ्यां।पद्भ्यामुदरेणशिश्ना।रात्रिस्तदवलुंपतु।यत्किंचदुरितंमयि।इदमहंमाममृतयोनौसूर्येज्योतिषिजुहोमिस्वाहा।८४॥अथाकृत्यु
दाहरणं॥वेदोसिवित्तिरसिविदेयकर्मासिकरणमसिक्रियासिसनिरसिसनितासिसनेयंघृतवंतंकुलायिनंरायस्पोषंसहस्रिणंवेदोददातुवाजिनं
यंवहवउपजीवंतिप्रयोजनानामसहरीतंविदेयप्रजांविदेयकामायत्वा॥८८॥अथविकृत्युदाहरणं॥नमोवःपितरइषेनमोवःपितरऊर्जेनमोवः
पितरःशुष्मायनमोवःपितरोघोरायनमोवःपितरोजीवायनमोवःपितरोरसाय।स्वधावःपितरोनमोवःपितरोनमएतायुष्माकंपितरइमाअस्माकं
जीवावोजीवंतइहसंतःस्याम।बृह॥९२॥अथसंकृत्युदाहरणं॥देवोअग्निःस्विष्टकृत्सुद्रविणामंद्रःकविःसत्यमन्मायजीहोताहोतुर्होतुरायजीया

१९ नमेयंदेवानयाश्चौंअबिभर्येनेहोत्रेअमत्सततांससतुर्पीहोत्रांदेवंगमांदिविदेवेषुयज्ञमेरयेमंस्विष्टकृच्चाग्नेहोताभूर्वसकवनेवसुधेयस्यनमोवाके
वीहीति।बृह:३६॥ अथाभिकृत्स्योदाहरणं॥ऋतपतयेनमोभुवनपतयेनमोभूतानांपतयेनमोभूतयेनम:प्राणंप्रपद्येऽपानंप्रपद्येव्यानंप्रपद्येवा
चंप्रपद्येश्रोत्रंप्रपद्येमन:प्रपद्यआत्मानंप्रपद्येगायत्रींप्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येनुष्टुभंप्रपद्येछंदांसिप्रपद्ये।बृह:१००॥ अथोत्कृत्स्योदाहर
णं।अश्विनाष्ट्रेश्रियमावेशयाम्यतोदेवी:प्रतिपश्याम्याप:।दक्षिणंपादमवनेनिजेऽस्मिन्राष्ट्रइंद्रियंदधामि।सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंवर्द्धयामि
पूर्वमन्यमपरमन्यंपादाववनेनिजे।देवाराष्ट्रस्यगुप्त्याअभयस्यावरुध्यै।आप:पादावनेजनीर्द्विषंतंनिर्दहंतुमे॥१०४॥इतिकृत्यादीनिसप्तछंदांस्युक्त
त्वंतानिब्राह्मणसूत्रयोरुदाहरणानिनिचृत्तक्कारिकाविराट्स्वराट्‌यथाज्ञानंवेदितव्यानि॥११॥इत्येकादशखंड:॥ ॥अथसूक्तसंख्यर्षिदैवतछंदा
तिदेशादधिक्रियंते॥सूक्तसंख्यानुवर्त्ततआन्यस्या:सूक्तसंख्याया:।परिभाषेयंसूक्तेयावत्संख्यापूर्वमुक्ता:साअन्यस्या:सूक्तसंख्याया:आ
क्वविज्ञेया।यथाग्निमीळेनवर्चंसूक्तंसंख्यापरसूक्तेवायवायाहीत्येतावत्संख्येतिनिदर्शनं॥ ॥साक्ष्याश्चान्यस्मादृषेयवाविशिष्ट:॥ ॥चकारात्तक्र
षिरनुवर्त्तते।प्रकृतक्रषिर्यावदनुवर्त्ततेतावदन्यत्रऋषेर्निदर्शनं।यथाजेतामाधुछंदसइत्यस्मिन्सूक्तेतत्रविश्वामित्रमधुछंदसोनिवृत्तिरित्येवमादि।अ
थवावाशब्देनविशेषितोभवति।यथात्वंह्यग्नेप्रथमोमनोतास्त्रितोवा।तदास्त्रितस्यवाशब्दस्यविशिष्टत्वात्।उत्तरसूक्तमिंद्रंमित्रंवरुणमग्निमूतय १९
इत्यादावनुवृत्तिर्नभवतीत्येवंसर्वत्र।तुह्हिवैतत्पादविशिष्टान्यृषिदेवतछंदांसिहिनिचृतु:पंचषट्सूक्तभांजियथासंख्यं।तुह्हिवैतादित्ये

तै:शब्दैर्विशिष्टैर्ऋग्यादीनि।एतै:शब्दै:पुरोवस्कैरनंतरैरित्यर्थ:।तुद्ध:संज्ञा।हितिसंज्ञा।हचतु:संज्ञा।वैपंचसंज्ञा।तवषट्संज्ञा।तस्योदाहरणं।
यथाग्नेत्रेक:स्मरहोत्रसूक्त।तुशब्दात्उत्तरसूक्तेस्कहोत्रकऋषिर्वेदितव्य:।तथापरोवैछवंतु।तुशब्दात्उत्तरसूक्तेनूमर्त्तइत्यत्रविष्णुर्देवतेत्यर्थ:।अपि
च॥प्रव:पंचोनागायत्रंतु॥तुशब्दात्उत्तरसूक्तेअग्नेजुषस्वनोहविरित्यत्रगायत्रंछंदोवेदितव्यं॥एवमुत्तरत्रर्षिदैवतछंदांसियथासंख्येनद्रष्टव्यानि॥आनि
रुक्तासंख्याविंशति:॥सूक्तमृक्संख्याआनिरुक्ताअनुच्चारिता॥ऊनाधिकेसविंशतिरनादेशात्इंद्र:प्रत्येतव्य:॥तस्योदाहरणं॥यथाकस्यपंचोना॥अ
पिच॥केष्ठेकेनेत्यनशब्दात्विंशति:प्रतीति:।तथामानोधिका।अपिच।अग्निंपंचाधिकेत्यधिकशब्दात्विंशति:प्रतीति:सर्वत्र।अनादेशेत्विं
द्रोदेवता॥ ॥अस्यसूक्तस्यदेवतानोच्यते॥ ॥तत्रविशेषानभिधानेइंद्र:प्रत्येतव्य:।तस्योदाहरणं॥ऋतपक्तुंदशैंद्रं।आतु।युंजंतीत्यादि
यथा॥ ॥त्रिष्टुप्छंद:॥अनादेशइत्येव॥यत्सूक्तस्यछंदोभिधानंनास्ति॥तत्रानादेशात्त्रिष्टुबित्यर्थ:सर्वत्र॥तस्योदाहरणं॥एतायामोप
गव्यंत:॥अपिच॥कयाम्यग्निभिर्विसूक्तेत्रैष्टुभेवेदितव्ये।एवंसर्वत्र॥प्रगाथाबार्हता:॥अनादेशइत्येव॥प्रगाथविशेषानभिधानेबार्हत
प्रगाथा:प्रत्येतव्य:॥तस्योदाहरणं॥प्रवोविंशति:काण्वाधौरआग्नेयंप्रगाथं॥तथामेषुसप्ताधिका॥प्रागाथमितिच॥ ॥विंशिकाद्विप
दाविराज:।विंशिकाद्विपदाविंशत्यक्षराइत्यर्थ:।द्विपदास्ता:खल्वनादेशेछंदसोविशेषानभिधानेविराजोज्ञेया:सर्वत्र।तस्योदाहरणं।
पश्वानतायुमितिषट्सूक्तानि॥तदर्धमेकपदा।तदर्धंदशाक्षराइत्यर्थ:॥अेकपदाअनादेशेछंदोविशेषानभिधानेविराजोज्ञेया:॥

२० तस्योदाहरणं। अग्निश्च ग्रावाणं यजमान इत्यादयः। अथ केषां विराड्नामकतः संशय इति। न ह्येकविंशके गायत्र्याद्यक्षरसंते विराजं पश्यामः। नन्वनुष्टुभादि
विकारेष्वस्ति। अस्त्वेवा अपिच। बहुत्वात् संशयः। कथमस्ति हि खल्वनुष्टुभो विराट्त्वं। दशकास्त्रयो विराळेकादशा भवंति। अपिच। बृहत्याः खल्व
पि सावोर्ध्वबृहती विराळिति वचनात्। शौनकाचार्यस्य पंक्तेः खल्वपि विराट्त्वं। चत्वारो दशका विराळिति प्रातिशाख्ये। तथैकविंशतिरपि
छंदसां विराट्त्वमिष्यते। एकोनेत्यक्षपक्रममद्वाभ्यां विराळित्याह। भगवता शौनकेनाप्युक्तं। विराजस्त्वतरस्येत्यादिना। अतश्चैकविंशतिर्वि
राजो भवंति। द्वाविंशाक्षरादयः। द्विशताक्षरपर्यंता ततश्च न ज्ञायंते। केषां विराळित्येव संदेहः। तत्राक्षराण्येव सर्वत्र निमित्तं बहुवचनरभि
तिच्चतुष्पात्त्वेन च पाठात्। बह्वृचानां चत्वारिंशदक्षरा भवत्यतः। पंक्तेर्विराट्त्वमेवाध्यवस्यते। सर्वानुक्रमण्यां च पश्यत्यक्षपक्रमप्यपंच का
नि पंक्तेरुक्तं। तच्चेच्चतुष्पात्करणेनैव उपपद्यते। पुनश्चाह। विराजो द्विपदाः केचित्सर्वा आहुश्चतुष्पदाः। कृत्वा पंचाक्षरान् पादौ तांस्तथा
क्षरपंक्तय इति प्रातिशाख्यवचनात्। एक एव पदान्येषां द्वौ पादौ द्विपदोच्यते। श्रोत्रमेतदनुतेनैव सत्त्रपेयस्यपादतद्वि। द्विर्द्विपदास्त्वचः स
मानंति। यस्य सूक्तस्य द्विपदाद्विः समामनंति। तास्त्वच चतुष्पदाः कृत्वेत्यर्थः। तस्योदाहरणं। पश्वा न तायुं गुहा चतंतं ·१·। नमो·हंतं·१·२
सजो·गमन्। १·। उप·प्रयजनाः। १०। इत्येकर्चत्वात् द्विपदासति च चतुष्पात्त्वमध्यापने शिष्योपदेशश्च सर्वत्र बोद्धव्यं। अस्मेत्वं नो अंतम इति
द्वितीयनिदर्शनं। अयुक्त्वंत्यद्विपदैव। सूक्तर्चायुजो यान भवंति। नास्त्वत्या द्विपदा एव। यथा साधुर्नगभुरित्युदाहरणं। मंडलादिषामेय २०

मैंद्रात्। मंडलादिषु देवता अनादेशे तत्राग्नेयं प्रतीयात्। यथा अग्निमीळ इत्याद्यं मंडलमित्यर्थः। आइंद्रदर्शनात्। आग्नेयत्वनिवृत्तिः। सर्वत्र मंडलादि
बोद्धव्यं। ततः मा चिदन्यद्विशंसते त्यष्टमे मंडले ऐंद्रशब्दात् आग्नेयत्वं नास्ति। अपिच। स्वादिष्ठया मदिष्ठयेति नवमं मंडलं पावमानं सौम्यं चेत्यत्राग्ने
यत्वं नास्ति। त्रिष्टुबंतस्य सूक्तस्य शिष्टा जगत्यः। त्रिष्टुबंते यस्य त्रिष्टुप्तो वा। त्रिष्टुबंतं सूक्तं तस्य सूक्तस्यानादेशे अन्यस्य छंदसः शिष्टजगतीं प्रतीया
त्सर्वत्र। यथा गायत्रेत्यादेवी त्रिष्टुप्चेत्का सा जागतं न भवति। त्रिष्टुबंतस्य जागतसूक्तस्य वेदिषद इत्युदाहरणं बोद्धव्यं। आदौ गायत्री यत्र प्राग्धि
रण्यस्तूपात्। आदावृग्वेदस्याग्निमीळ इत्यारभ्य तन्मध्ये प्रथमो आंगिरा इ संवाहिरण्यस्तूपर्षेर्दृश्यमाने गायत्रं छंदः। प्रतीयादनादेशात्। अ
पवादपरिहारेणैतद्रष्टव्यं। तन्मध्ये गायंति त्वा सूक्तमानुष्टुभं तथा कण्वन्नं सूक्तं त्रैष्टुभं तथा या विक्रिस्पसव्ये तिसूक्तं पांक्तमिति स्पष्टार्थमुक्तं
बोद्धव्यं॥ १२॥ इति द्वादशखंडः॥ अथ ऋषिपत्न्या अभिधानाच्यंते। गोधा। घोषा। विश्ववारा। अपाला। उपनिषद। ब्रह्मजाया। जुहूः। अगस्त्यस्य स्वसाः
। अदितिः। इंद्राणी। इंद्रमाता। सरमा। रोमशा। उर्वशी। लोपामुद्रा। नदी। यमी। नारी। शाश्वती। श्रीः। लक्ष्मी। सार्पराज्ञी। वाक्। श्रद्धा। मेधा। दक्षिणा।
रात्री। सूर्या। सावित्री। एताः सर्वाः सप्तविंशिका ब्रह्मवादिन्यः ईरिताः प्रेरिता इत्यर्थः॥ १३॥ इति त्रयोदशखंडः॥ ॥ इति श्रीमदृग्वेदानुक्रमणि
दीपिकायां डोरवलोपनामकश्च सदृक्षैनास्कृत गणेशकृतौ पारभाषोदाहरणं ग्रंथः समाप्तः॥ ॥ श्रीसप्तकोटीश्वरचरणयोः समर्पितं॥ ॥

२९

२३